Text Book for

# Intermediate

First Year

Second Language : Part II

# SANSKRIT

## सुरभाषासुषमा
Sanskrit Text

## उपवाचकम्
Sanskrit Non-Detailed

&

## व्याकरणम्
Sanskrit Grammar

Board of Intermediate Education, Andhra Pradesh

Telugu and Sanskrit Akademi, Andhra Pradesh

# Intermediate

First Year Text Book

# Sanskrit

Pages : xviii + 158 + iv

© Board of Intermediate Education
Andhra Pradesh.

**Reprint**

**2023**

**Copies : 72000**

- Published by Telugu and Sanskrit Akademi, Andhra Pradesh under the Centrally Sponsored Scheme of Production of Books and Literature in Regional Languages at the University level of the Government of India in the Ministry of Human Resource Development, New Delhi.

- All rights whatsoever in this book are strictly reserved and no portion of it may be reproduced by any process for any purpose without the written permission and prescribed by Board of Intermediate Education A.P. Vijayawada of the Copyright Owners.

Price Rs. : **87.00**

---

**Printed in India**

Laser Typeset by : **Telugu and Sanskrit Akademi,** Andhra Pradesh

***Published and Printed by***

**M/s. GBR Offset Printers and Publishers**

Surampalli, Krishna Dist.,

on behalf of **Telugu and Sanskrit Akademi**, Andhra Pradesh



**Y.S. JAGAN MOHAN REDDY**

**CHIEF MINISTER**
**ANDHRA PRADESH**

**AMARAVATI**

# MESSAGE

I congratulate Akademi for starting its activities with printing of textbooks from the academic year 2021 – 22.

Education is a real asset which cannot be stolen by anyone and it is the foundation on which children build their future. As the world has become a global village, children will have to complete with the world as they grow up. For this there is every need for good books and good education.

Our government has brought in many changes in the education system and more are to come. The government has been taking care to provide education to the poor and needy through various measures, like developing infrastructure, upgrading the skills of teachers, providing incentives to the children and parents to pursue education. Nutritious mid-day meal and converting Anganwadis into pre-primary schools with English as medium of instruction are the steps taken to initiate children into education from a young age. Besides introducing CBSE syllabus and Telugu as a compulsory subject, the government has taken up numerous innovative programmes.

The revival of the Akademi also took place during the tenure of our government as it was neglected after the State was bifurcated. The Akademi, which was started on August 6, 1968 in the undivided state of Andhra Pradesh, was printing text books, works of popular writers and books for competitive exams and personality development.

Our government has decided to make available all kinds of books required for students and employees through Akademi, with headquarters at Tirupati.

I extend my best wishes to the Akademi and hope it will regain its past glory.

**(Y.S. Jagan Mohan Reddy)**

**Dr. Nandamuri Lakshmiparvathi**
M.A., M.Phil., Ph.D.
Chairperson, (Cabinet Minister Rank)
Telugu and Sanskrit Akademi, A.P.

## Message of Chairperson, Telugu and Sanskrit Akademi, A.P.

In accordance with the syllabus developed by the Board of Intermediate, State Council for Higher Education, SCERT etc., we design high quality Text books by recruiting efficient Professors, department heads and faculty members from various Universities and Colleges as writers and editors. We are taking steps to print the required number of these books in a timely manner and distribute through the Akademi's Regional Centers present across the Andhra Pradesh.

In addition to text books, we strive to keep monographs, dictionaries, dialect texts, question banks, contact texts, popular texts, essays, linguistics texts, school level dictionaries, glossaries, etc., updated and printed and made available to students from time to time.

For competitive examinations conducted by the Andhra Pradesh Public Service Commission and for Entrance examinations conducted by various Universities, the contents of the Akademi publications are taken as standard. So, I want all the students and Employees to make use of Akademi books of high standards for their golden future.

Congratulations and best wishes to all of you.

**(Nandamuri Lakshmiparvathi)**
Chairperson Telugu and Sanskrit Academi, A.P

**J. SYAMALA RAO,** I.A.S.,
Principal Secretary to Government

**Higher Education Department**
Government of Andhra Pradesh

# MESSAGE

I Congratulate Telugu and Sanskrit Akademi for taking up the initiative of printing and distributing textbooks in both Telugu and English media within a short span of establishing Telugu and Sanskrit Akademi.

Number of students of Andhra Pradesh are competing of National Level for admissions into Medicine and Engineering courses. In order to help these students Telugu and Sanskrit Akademi consultation with NCERT redesigned their Textbooks to suit the requirement of National Level Examinations in a lucid language.

As the content in Telugu and Sanskrit Akademi books is highly informative and authentic, printed in multi-color on high quality paper and will be made available to the students in a time bound manner. I hope all the students in Andhra Pradesh will utilize the Akademi textbooks for better understanding of the subjects to compete of state and national levels.

**(J. SYAMALA RAO)**

# THE CONSTITUTION OF INDIA

# PREAMBLE

WE, THE PEOPLE OF INDIA, having solemnly resolved to constitute India into a [SOVEREIGN SOCIALIST SECULAR DEMOCRATIC REPUBLIC] and to secure to all its citizens:

JUSTICE, social, economic and political;

LIBERTY of thought, expression, belief, faith and worship;

EQUALITY of status and of opportunity; and to promote among them all

FRATERNITY assuring the dignity of the individual and the [unity and integrity of the Nation];

IN OUR CONSTITUENT ASSEMBLY this twenty-sixth day of November, 1949 do HEREBY ADOPT, ENACT AND GIVE TO OURSELVES THIS CONSTITUTION.

# Text Book Development Committee-AP

## CHIEF EDITOR

**Prof. Gopala. Padmanabham**
Professor & Head, Dept. of Sanskrit
Sri Venkateswara University, Tirupati

## Editors & Course Writers

**Dr. M.V.N. Pavana Kumara Sarma**
Assistant Professor
Dept., of Apastamba Pourohitya
Sri Venkateswara Vedic University, Tirupati

**Dr. S.L.B Sankara Sarma**
Assistant Professor & Head
Dept., of Sanskrit, Govt. College for Women (A), Guntur

## Course Writers

**B.A.R.Viswanadham**
Junior Lecturer in Sanskrit
Govt. Junior College, Rajamahendravaram

**Dr. Y. Nagendramma**
Junior Lecturer in Sanskrit
Govt. Junior College For Men, Kadapa

## Coordinating Committee of Board of Intermediate Education, A.P.

**Sri M.V. Seshagiri Babu**, I.A.S.
**Secretary**
Board of Intermediate Education,
Andhra Pradesh

## Educational Research & Training Wing (Text Book)

**Dr. A. Srinivasulu**
Professor

**Sri. M. Ravi Sankar Naik**
Assistant Professor

**Dr. M. Ramana Reddy**
Assistant Professor

**Sri J.V. Ramana Gupta**
Assistant Professor

## Telugu and Sanskrit Akademi, Andhra Pradesh Coordinating Committee

**Sri V. Ramakrishna,** I.R.S.
Director

**Dr. M. Koteswaramma,** M.Com., Ph.D.
Research Officer

**Dr. S.A.T. Rajyalakshmi,** M.Sc., B.Ed., M.A., Ph.D.
Research Assistant

**Dr. K. Glory Sathyavani,** M.Sc., Ph.D., M.Ed.
Research Assistant

# सुरभाषासुथमा

## पुरोवाक

संस्कृतं नास दैपीवागन्वख्याता महर्षिभिः इति अमरवाण्या प्रशश्त्यं निरूपितम्, अपि तु रामायण-भारत- पुराणादिकं लौकिकवाङ्ग्यमपि तस्मिन् काले गीर्वाणवाण्यामेव अभिहितमासीत्। आधुनिककाले न मेवलं भारतीयविद्वांसः, पाश्चात्यपण्डिता अपि संस्कृतसाहित्यं सम्यक् परिशील्य तस्य वैशिष्ट्चं बहुधा प्रशाशंसुः। भारतीय संस्कृतिः संस्कृतभाषाम् आधारीकृत्यैब विस्तृतिं लेभे। तस्मात् संस्कृतभाषायाः अध्यनमत्यन्तमाबश्यकमिति निश्चप्रचम्।

अत एव अस्यां मुर्भाषासुषमायां आर्षवाङ्ग्यादारभ्य आधुनिकवाङ्ग्यपर्यन्तं सुप्रसिद्धग्रन्येभ्यः संस्कारः, देशाभक्तिः धर्मनिष्ठा च बृद्धिं गच्छतीति सम्यातकवर्गस्य द्रढीयान् अर्वाचीनकविभ्यो धन्यवादांश्च निवेदयति। अत्र ग्रन्थे भागषट्कं वर्तते। यथा- पद्यभागः, गद्यभागः, उपवाचकम्, व्याकरणम्, शेमुषीपरीक्षा वाक्य-निर्माणं चेति।

अन्ते छात्राणाम् अध्यापकानां परीक्षकाणां च सौफर्य मनसिकृत्य अङ्गविभाजनं मानकप्रश्नपत्रं च न्यधायिषाताम् येन इतोऽधिकाः छात्राः संस्कृताध्ययने अभिरुचिं प्राप्नुयुः इति आशास्महे ।

**संस्कृतं संस्कृतेर्मूलं वर्धतामभिवर्धताम् ।**
**भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा ।**
**जयतु संस्कृतम् - जयतु भारतम् ।**

**संपादक वर्गः**

# विषयसूची

## पद्यभागः


१. दशरथस्य पश्चात्तापः - वाल्मीकिः................................ 1 - 6

२. मायावटुः - कालिदासः ........................................ 7 - 15

३. भर्तृहरिसुभाषितानि - भर्तृहरिः ..................................... 16 - 23

४. नीतिश्लोकाः - विभिन्नग्रन्थेभ्यः .................................... 24 - 28

५. अमरवाणीप्रशस्तिः - एन् शठकोपाचार्यः .......................... 29 - 33

६. कपीनामुपवासः - श्रीशैलं ताताचार्यः .............................. 34 - 42


## गद्यभागः


१. कपिञ्जलोपदेशः - बाणभट्टः ....................................... 45 - 50

२. भोजस्य औदार्यम् - बल्लालः ....................................... 51 - 58

३. शश-कपिञ्जलकथा - विष्णुशर्मा .................................. 59 - 66

४. श्रीमलयाळस्वामी - संस्कृतभाषासेवा - समुद्राललक्ष्मणय्य ...... 67 - 72

५. स्वेदस्य पुष्पाणि - डा.माधवीजोषी ................................ 73 - 78

६. वर्षापरिदेवनम् - म.म. आचार्य- गुल्लपल्लि.श्रीरामकृष्णमूर्तिः ...... 79 - 84

## उपवाचकम्


१. कौटिल्यः - म.म. आचार्य - पुल्लेल.श्रीरामचन्द्रः ................ 87 - 89

२. अन्नं बहु कुर्वीत - डा.एम्.वेङ्कटनागपवनकुमारशर्मा ............... 90 - 92

३. बोपदेवः - वागीश्वरीशिवरामः ...................................... 93 - 94

४. परीक्षा - सुगन्धः .................................................. 95 - 97

५. त्यागस्य महिमा - डा.सञ्जीवः .....................................98 - 100

६. वास्तविकताम् अवगच्छतु - डा.सञ्जीवः ........................101 - 104


## व्याकरणम्


१. शब्दाः ........................................................... 107 - 117

२. धातुरूपाणि ..................................................... 118 - 133

३. सन्धयः .......................................................... 134 - 136

पत्रलेखनम् ........................................................ 137 - 140

अनुवादाभ्यासः .................................................. 141 - 142

सङ्ख्याः ........................................................... 143 - 145

अनुबन्धः............................................................ 146 - 147

सरळवाक्यानि ..................................................... 148 - 150

नैव क्लिष्टा न च कठिना ................................ 151

समयः ............................................................... 152 - 153

# पद्यभागः

१. दशरथस्य पश्चात्तापः - वाल्मीकिः

२. मायावटुः - कालिदासः

३. भर्तृहरिसुभाषितानि - भर्तृहरिः

४. नीतिश्लोकाः - विभिन्नग्रन्थेभ्यः

५. अमरवाणीप्रशस्तिः - एन् शठकोपाचार्यः

६. कपीनामुपवासः - श्रीशैलं ताताचार्यः

# पद्यभागः....

# १ दशरथस्य पश्चात्तापः

## वाल्मीकिः

## परिचयः

वाल्मीकिमहर्षिः आदिकविः। अनेन विरचितं श्रीमद्रामायणम् आदिकाव्यमिति कथ्यते। अत्र सप्त काण्डाः सन्ति। चतुर्विंशति सहस्रश्लोकाः सन्ति। अस्मिन् श्रीरामस्य चरितं वर्णितम्। रामः श्रीमन्नारायण इति, रामायणं वेदस्य प्रतिरूपमिति च कथयन्ति। श्रीमद्रामायणे दम्पत्योः परस्परानुरागः, भ्रातृप्रेमा, गुरुभक्तिः, पितृवाक्य-परिपालनम्, मित्रस्नेहः, शरणागतरक्षणम्, धर्मानुष्ठानम्, प्रजारञ्जकपालनम् इत्यादयो अनेके आचरणीयाः धर्माः सुष्ठु निरूपिताः । अत एवोक्तम् -

**यावत्स्थास्यन्ति गिरयः सरितश्च महीतले।**
**तावद्रामायणकथा लोकेषु प्रचरिष्यति॥** इति॥

### पाठ्यभागपरिचयः

अयं पाठ्यभागः वाल्मीकिरामायणे अयोध्याकाण्डान्तर्गत ६३, ६४ सर्गाभ्यां स्वीकृतः। अत्र पुत्रवियोगेन दशरथस्य मरणकारणभूतो मुनिशापवृत्तान्तः वर्णितः। कैकेय्याः वरदानेन रामः वनं गतः। ततः पुत्रवियोगेन दुःखी दशरथः कौसल्यां प्रति अमुं वृत्तान्तं श्रावयति।

१. **यदाचरति कल्याणि शुभं वा यदि वाऽशुभम्।**
**तदेव लभते भद्रे कर्ता कर्मजमात्मनः॥**

२. **गुरुलाघवमर्थानामारम्भे कर्मणां फलम्।**
**दोषं वा यो न जानाति स बाल इति होच्यते॥**

३. लब्धशब्देन कौसल्ये कुमारेण धनुष्मता।
कुमारः शब्दवेधीति मया पापमिदं कृतम् ॥

४. तदिदं मेऽनुसंप्राप्तं देवि दुःखं स्वयं कृतम् ।
संमोहादिह बालेन यथा स्याद्भक्षितं विषम् ॥

५. देव्यनूढा त्वमभवो युवराजो भवाम्यहम् ।
ततः प्रावृडनुप्राप्ता मदकामविवर्धिनी ॥

६. तस्मिन्नतिसुखे काले धनुष्मानिषुमान् रथी।
व्यायामकृतसंकल्पः सरयूमन्वगां नदीम् ॥

७. अथान्धकारे त्वश्रौषं जले कुम्भस्य पूर्यतः।
अचक्षुर्विषये घोषं वारणस्येव नर्दतः ॥

८. ततोऽहं शरमुद्धृत्य दीप्तमाशीविषोपमम् ।
शब्दं प्रति गजप्रेप्सुरभिलक्ष्य त्वपातयम् ॥

९. अमुञ्चं निशितं बाणमहमाशीविषोपमम् ।
तत्र वागुषसि व्यक्ता प्रादुरासीद्वनौकसः ॥

१०. हाहेति पततस्तोये बाणाभिहतमर्मणः।
तस्मिन्निपतिते बाणे वागभूत्तत्र मानुषी ॥

११. कथमस्मद्विधे शस्त्रं निपतेच्च तपस्विनि।
प्रविविक्तां नदीं रात्रावुदाहारोऽहमागतः ॥

१२. कथं नु शस्त्रेण वधो मद्विधस्य विधीयते।
जटाभारधरस्यैव वल्कलाजिनवाससः ॥

१३. मातरं पितरं चोभावनुशोचामि मद्वधे ।
तदेतन्मिथुनं वृद्धं चिरकालभृतं मया ॥

१४. केन स्म निहताः सर्वे सुबालेनाकृतात्मना ।
तां गिरं करुणां श्रुत्वा मम धर्मानुकाङ्क्षिणः ।।

१५. अपश्यमिषुणा तीरे सरय्वास्तापसं हतम् ।
अवकीर्णजटाभारं प्रविद्धकलशोदकम् ।।

१६. इत्युवाच वचः क्रूरं दिधक्षन्निव तेजसा ।
किं तवापकृतं राजन् वने निवसता मया ।।

१७. जिहीर्षुरम्भो गुर्वर्थं यदहं ताडितस्त्वया ।
एकेन खलु बाणेन मर्मण्यभिहते मयि ।।

१८. द्वावन्धौ निहतौ वृद्धौ माता जनयिता च मे ।
तौ नूनं दुर्बलावन्धौ मत्प्रतीक्षौ पिपासितौ ।।

१९. भिद्यमानमिवाशक्तस्त्रातुमन्यो नगो नगम् ।
पितुस्त्वमेव मे गत्वा शीघ्रमाचक्ष्व राघव ।।

२०. ततस्तं घटमादाय पूर्णं परमवारिणा ।
आश्रमं तमहं प्राप्य यथाऽख्यातपथं गतः ।।

२१. तत्राहं दुर्बलावन्धौ वृद्धावपरिणायकौ ।
अपश्यं तस्य पितरौ लूनपक्षाविव द्विजौ ।।

२२. पदशब्दं तु मे श्रुत्वा मुनिवाक्यमभाषत ।
किं चिरायसि मे पुत्र पानीयं क्षिप्रमानय ।।

२३. क्षत्रियोऽहं दशरथो नाहं पुत्रो महात्मनः ।
सज्जनावमतं दुःखमिदं प्राप्तं स्वकर्मजम् ।।

२४. भगवंश्चापहस्तोऽहं सरयूतीरमागतः ।
जिघांसुः श्वापदं कंचिन्निपाने चाऽगतं गजम् ।।

२५. ततश्श्रुतो मया शब्दो जले कुम्भस्य पूर्यतः।
द्विपोऽयमिति मत्वाऽहं बाणेनाभिहतो मया।।

२६. गत्वा नद्यास्ततस्तीरमपस्यमिषुणा हृदि ।
विनिर्भिन्नं गतप्राणं शयानं भुवि तापसम् ।।

२७. अज्ञानाद्भवतः पुत्रः सहसाऽभिहतो मया।
शेषमेवं गते यत्स्यात् तत्प्रसीदतु मे मुनिः ।।

२८. स तच्छ्रुत्वा वचः क्रूरं मया तदघशंसिना ।
नाशकत् तीव्रमायासमकर्तुं भगवानृषिः ।।

२९. स बाष्पपूर्णवदनो निःश्वसन् शोककर्शितः।
मामुवाच महातेजाः कृताञ्जलिमुपस्थितम्।।

३०. त्वया तु यदविज्ञानात् निहतो मे सुतश्शुचिः।
तेन त्वामभिशप्स्यामि सुदुःखमतिदारुणम्।।

३१. पुत्रव्यसनजं दुःखं यदेतन्मम साम्प्रतम्।
एवं त्वं पुत्रशोकेन राजन् कालं करिष्यसि।।

## अभ्यासः

### १. निबन्धप्रश्नौ

१. दशरथस्य दुःखं कथं स्वयंकृतमासीत् ?

२. 'दशरथस्य पश्चात्तापः' इति पाठस्य सारांशं लिखत।

### २. लघुसमाधानप्रश्नाः

१. कः बाल इति उच्यते ?

२. दशरथस्य पश्चात्तापः इति कस्मात् ग्रन्थात् उद्धृतः?

३. सरयूनदीतीरे दशरथः कम् अपश्यत् ?
४. मुनिः दशरथं किमिति शशाप ?

## ३. एकपदसमाधानप्रश्नाः

१. अयोध्यानगरस्य राजा कः ?
२. दशरथः कां नदीम् अन्वगात् ?
३. घटमादाय दशरथः कुत्र जगाम ?
४. दशरथः किं मत्वा बाणं प्रयुयोज ?

## ४. सन्दर्भवाक्यानि

१. अचक्षुर्विषये घोषं वारणस्येव नर्दतः।
२. पितुस्त्वमेव मे गत्वा शीघ्रमाचक्ष्व राघव।
३. द्विपोऽयमिति मत्वाऽहं बाणेनाभिहतो मया।
४. एवं त्वं पुत्रशोकेन राजन् कालं करिष्यसि।

### विशेषतो ज्ञेयाः

## ५. कठिनशब्दार्थाः

चापः - बाणः ।
वारणस्य - गजस्य ।
वाससः - वस्त्रस्य ।
आचक्ष्व -वद ।
द्विपः - गजः ।
निहतः - मारितः ।
द्विजौ - पक्षिणौ ।

## व्याकरणांशाः

### ६. सन्धयः

| | | |
|---|---|---|
| अथ + अन्धकारम् | = अथान्धकारम् | - सवर्णदीर्घसन्धिः |
| विष + उपमम् | = विषोपमम् | - गुणसन्धिः |
| जराभारधरस्य + एव | = जराभारधरस्यैव | - वृद्धिसन्धिः |
| मर्मणि + अभिहतः | = मर्मण्यभिहतः | - यणादेशसन्धिः |
| बाणेन + अभिहतः | = बाणेनाभिहतः | - सवर्णदीर्घसन्धिः |
| द्वौ + अन्धौ | = द्वावन्धौ | - अयवायावसन्धिः |

### ७. समासाः

| | | |
|---|---|---|
| कामविवर्धिनी | - कामस्य विवर्धिनी | - षष्ठीतत्पुरुषसमासः |
| व्यथितमर्मणः | - व्यथितं मर्म यस्य तस्य | - बहुव्रीहिसमासः |
| अकृतात्मा | - अकृतः आत्मा येन सः | - बहुव्रीहिसमासः |
| परमवारि | - परमं च तत् वारि च | - विशेषणपूर्वपद-कर्मधारयसमासः |
| लूनपक्षः | - लूनौ पक्षौ यस्य सः | - बहुव्रीहिसमासः |
| शोककर्शितः | - शोकेन कर्शितः | - तृतीयातत्पुरुषसमासः |
| गतप्राणः | - गताः प्राणाः यस्य सः | - बहुव्रीहिसमासः |
| कृताञ्जलिः | - कृतः अञ्जलिः येन सः | - बहुव्रीहिसमासः |

# २ मायावटुः

## कालिदासः

## परिचयः

प्रस्तुतपाठ्यभागः महाकविकालिदासेन विरचिते कुमारसम्भवमहाकाव्ये पञ्चम-सर्गात् स्वीकृतः। संस्कृतसाहित्ये पञ्चमहाकाव्येषु आदिमं महाकाव्यं कुमारसम्भवमिति प्रसिद्धम्। शिवमहापुराणात् इतिवृत्तं गृहीत्वा कालिदासः महाकाव्यमेतत् विलिलेख। महाकाव्येऽस्मिन् सप्तदशसर्गाः समुल्लसन्ति। परं केचन विमर्शकास्तु ''व्याख्यानचक्रवर्तिना श्रीमल्लिनाथसूरिणा अष्टमसर्गपर्यन्तमेव सञ्जीवनीसंज्ञिका व्याख्या विरचिता, नवमसर्गात् आरभ्य कालिदासभिन्नेन केनापि परिशिष्टं महाकाव्यमारचितमिति'' अभिप्रयन्ति। **''रत्नानि वै वररुचिर्नव विक्रमस्य''** इत्याभाणकानुसारं विक्रमादित्यस्य आस्थानसभां कालिदासः विभूषयामासेति ज्ञायते। महाकवेः कालिदासस्य लेखनीतः कुमारसम्भवम्, रघुवंशः इति महाकाव्यद्वयम्, ऋतुसंहारः, मेघसन्देशः इति खण्डकाव्यद्वयम्, विक्रमोर्वशीयम्, मालविकाग्निमित्रम्, अभिज्ञानशाकुन्तलम् इति रूपकत्रयं च विनिर्गतम्। कुमारसम्भव-महाकाव्ये पञ्चमसर्गे विराजमानः कश्चन कमनीयः रमणीयश्च भागः पाठ्यभागरूपेण निर्धारितः।

### पाठ्यभागपरिचयः

पार्वती परमशिवं पतिंवरासती घोरतरं तपस्तेपे। तपोवने तप आचरन्तीं पार्वतीं परीक्षितुं वटुरूपं धृत्वा शङ्करः तत्राजगाम। मायावटुः पार्वतीं कुशलप्रश्नान् पृष्ट्वा शिवनिन्दां कर्तुम् आरब्धवान्।

१. अथाजिनाषाढधरः प्रगल्भवाक्
ज्वलन्निव ब्रह्ममयेन तेजसा ।
विवेश कश्चिज्जटिलस्तपोवनं
शरीरबद्धः प्रथमाश्रमो यथा ॥

२. तमातिथेयी बहुमानपूर्वया
सपर्यया प्रत्युदियाय पार्वती ।
भवन्ति साम्येऽपि निविष्टचेतसां
वपुर्विशेषेष्वतिगौरवाः क्रियाः ॥

३. विधिप्रयुक्तां परिगृह्य सत्क्रियां
परिश्रमं नाम विनीय च क्षणम् ।
उमां स पश्यन्नृजुनैव चक्षुषा
प्रचक्रमे वक्तुमनुज्झितक्रमः ॥

४. अपि क्रियार्थं सुलभं समित्कुशं
जलान्यपि स्नानविधिक्षमाणि ते ।
अपि स्वशक्त्या तपसि प्रवर्तसे
शरीरमाद्यं खलु धर्मसाधनम् ॥

५. प्रयुक्तसत्कारविशेषमात्मना
न मां परं संप्रतिपत्तुमर्हसि।
यतस्सतां सन्नतगात्रि सङ्गतं
मनीषिभिस्साप्तपदीनमुच्यते ॥

६. अतोऽत्र किञ्चिद्भवतीं बहुक्षमां
द्विजातिभावादुपपन्नचापलः ।
अयं जनः प्रष्टुमनास्तपोधने
न चेद्रहस्यं प्रतिवक्तुमर्हसि ॥

७. कुले प्रसूतिः प्रथमस्य वेधसः
त्रिलोकसौन्दर्यमिवोदितं वपुः ।
अमृग्यमैश्वर्यसुखं नवं वयः
तपःफलं स्यात्किमतः परं वद ॥

८. अलभ्यशोकाभिभवेयमाकृतिः
विमानना सुभ्रु कुतः पितुर्गृहे ।
पराभिमर्शो न तवास्ति कः करं
प्रसारयेत्पन्नगरत्नसूचये ॥

९. दिवं यदि प्रार्थयसे वृथा श्रमः
पितुः प्रदेशास्तव देवभूमयः ।
अथोपयन्तारमलं समाधिना
न रत्नमन्विष्यति मृग्यते हि तत् ॥

१०. अवैमि सौभाग्यमदेन वञ्चितम्
तव प्रियं यश्चतुरावलोकिनः ।
करोति लक्ष्यं चिरमस्य चक्षुषो
न वक्त्रमात्मीयमरालपक्ष्मणः ॥

११. कियच्चिरं श्राम्यसि गौरि विद्यते
ममापि पूर्वाश्रमसञ्चितं तपः ।
तदर्धभागेन लभस्व काङ्क्षितं
वरं तमिच्छामि च साधु वेदितुम् ॥

१२. इति प्रविश्याभिहिता द्विजन्मना
मनोगतं सा न शशाक शंसितुम् ।
अथो वयस्यां परिपार्श्ववर्तिनीं
विवर्तितानञ्जननेत्रमैक्षत ॥

१३. सखी तदीया तमुवाच वर्णिनं
निबोध साधो तव चेत् कुतूहलम् ।
यदर्थमम्भोजमिवोष्णवारणम्
कृतं तपस्साधनमेतया वपुः ।।

१४. इयं महेन्द्रप्रभृतीनधिश्रियः
चतुर्दिगीशानवमत्य मानिनी ।
अरूपहार्यं मदनस्य निग्रहात्
पिनाकपाणिं पतिमाप्तुमिच्छति ।।

१५. द्रुमेषु सख्या कृतजन्मसु स्वयं
फलं तपस्साक्षिषु दृष्टमेष्वपि ।
न च प्ररोहाभिमुखोऽपि दृश्यते
मनोरथोऽस्याश्शशिमौळिसंश्रयः ।।

१६. अगूढसद्भावमितीङ्गितज्ञया
निवेदितो नैष्ठिकसुन्दरस्तया ।
अयीदमेवं परिहास इत्युमाम्
अपृच्छदव्यञ्जितहर्षलक्षणः ।।

१७. अथाग्रहस्ते मुकुळीकृताङ्गुलौ
समर्पयन्ती स्फटिकाक्षमालिकाम् ।
कथञ्चिदद्रेस्तनया मिताक्षरं
चिरव्यवस्थापितवागभाषत ।।

१८. यथा श्रुतं वेदविदां वर त्वया
जनोऽयमुच्चैः पदलङ्घनोत्सुकः ।
तपः किलेदं तदवाप्तिसाधनं
मनोरथानामगतिर्न विद्यते ।।

१९. अथाह वर्णी विदितो महेश्वरः
तदर्थिनी त्वं पुनरेव वर्तसे ।
अमङ्गलाभ्यासरतिं विचिन्त्य तं
तवानुवृत्तिं न च कर्तुमुत्सहे ।।

२०. अयुक्तरूपं किमतःपरं वद
त्रिनेत्रवक्षः सुलभं तवापि यत् ।
स्तनद्वयेऽस्मिन् हरिचन्दनास्पदे
पदं चिताभस्मरजः करिष्यति ।।

२१. इयं च तेऽन्या पुरतो विडम्बना
यदूढया वारणराजहार्यया ।
विलोक्य वृद्धोक्षमधिष्ठितं त्वया
महाजनः स्मेरमुखो भविष्यति ।।

२२. वपुर्विरूपाक्षमलक्ष्यजन्मता
दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद्बालमृगाक्षि मृग्यते
तदस्ति किं व्यस्तमपि त्रिलोचने ।।

२३. इति द्विजातौ प्रतिकूलवादिनि
प्रवेपमानाधरलक्ष्यकोपया ।
विकुञ्चितभ्रूलतमाहिते तया
विलोचने तिर्यगुपान्तलोहिते ।।

२४. उवाच चैनं परमार्थतो हरं
न वेत्सि नूनं यत एवमात्थ माम् ।
अलोकसामान्यमचिन्त्यहेतुकं
द्विषन्ति मन्दाश्चरितं महात्मनाम् ।।

२५. अकिञ्चनः सन् प्रभवस्स संपदां
त्रिलोकनाथः पितृसद्मगोचरः ।
स भीमरूपः शिव इत्युदीर्यते
न सन्ति याथार्थ्यविदः पिनाकिनः ।।

२६. विभूषणोद्भासि पिनद्धभोगि वा
गजाजिनालम्बि दुकूलधारि वा ।
कपालि वा स्यादथवेन्दुशेखरं
न विश्वमूर्तेरवधार्यते वपुः ।।

२७. असम्पदस्तस्य वृषेण गच्छतः
प्रभिन्नदिग्वारणवाहनो वृषा ।
करोति पादावुपगम्य मौळिना
विनिद्रमन्दाररजोऽरुणाङ्गुली ।।

२८. विवक्षता दोषमपि च्युतात्मना
त्वयैकमीशं प्रति साधु भाषितम् ।
यमामनन्त्यात्मभुवोऽपि कारणं
कथं स लक्ष्यप्रभवो भविष्यति।।

२९. अलं विवादेन यथा श्रुतस्त्वया
तथाविधस्तावदशेषमस्तु सः।
ममात्र भावैकरसं मनः स्थितं
न कामवृत्तिर्वचनीयमीक्ष्यते।।

३०. निवार्यतामालि किमप्ययं वटुः
पुनर्विवक्षुः स्फुरितोत्तराधरः।
न केवलं यो महतोऽपभाषते
शृणोति तस्मादपि यस्स पापभाक्।।

३१. इतो गमिष्याम्यथवेति वादिनी
चचाल बालास्तनभिन्नवल्कला ।
स्वरूपमास्थाय च तां कृतस्मितः
समाललम्बे वृषराजकेतनः ।।

३२. तं वीक्ष्य वेपथुमती सरसाङ्गयष्टिः
निक्षेपणाय पदमुद्धृतमुद्वहन्ती ।
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ ।।

३२. अद्य प्रभृत्यवनताङ्गि तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौळौ ।
अह्नाय सा नियमजं क्लममुत्ससर्ज
क्लेशः फलेन हि पुनर्नवतां विधत्ते ।।

## अभ्यासः

### १. निबन्धप्रश्नौ

१.'मायावटुः' इति पाठ्यभागस्य सारांशं संक्षेपेण लिखत।

२. मायावटोः सम्भाषणकौशलं संक्षेपेण वर्णयत।

### २. लघुसमाधानप्रश्नाः

१. पार्वत्याः तपोवनं कीदृशः वटुः विवेश ?

२. कालिदासमहाकवेः काव्ये के ?

३. देवभूमयः काः?

४. धर्मसाधनेषु आद्यं किम् ?

### ३. एकपदसमाधानप्रश्नाः

१. पार्वत्याः तपोवनं कः प्रविवेश?

२. मायावटुः कः?

३. पिनाकपाणिं का पतिमाप्तुम् इच्छति?
४. 'मायावटुः' इति पाठ्यभागः कस्मात् स्वीकृतः?

## ४. सन्दर्भवाक्यानि

१. शरीरमाद्यं खलु धर्मसाधनम्।
२. मनीषिभिस्साप्तपदीनमुच्यते।
३. न रत्नमन्विष्यति मृग्यते हि तत्।
४. क्लेशः फलेन हि पुनर्नवतां विधत्ते।

### विशेषतो ज्ञेयाः

## ५. कठिनशब्दार्थाः

षट्पदः - भ्रमरः
अजिनम् - कृष्ममृगचर्म
वीरुधः - लताविशेषः
त्रिवर्गः - धर्म-अर्थ-कामाः
वल्कलम् - वृक्षसम्बन्धी वस्त्रविशेषः
विभावरी - रात्रिः
द्विजन्मा - ब्राह्मणः
शशाङ्कलेखा - चन्द्ररेखा
अम्भोजम् - पद्मम्
उष्णवारणम् - छत्रः
पुष्पधन्वा - मन्मथः
उटजः - पर्णशाला

### व्याकरणांशाः

## ६. सन्धयः

तपोभिः + आत्मनः = तपोभिरात्मनः - विसर्गसन्धिः
तपः + समाधये = तपस्समाधये - विसर्गसन्धिः

| | | |
|---|---|---|
| कृत + अभिषेकाम् | = कृताभिषेकाम् | - सवर्णदीर्घसन्धि: |
| अभि + उपागमनम् | = अभ्युपागमनम् | - यणादेशसन्धि: |
| प्रसव + अर्चित | = प्रसवार्चित | - सवर्णदीर्घसन्धि: |
| चरण + इन्धन | = चरणेन्धन | - गुणसन्धि: |
| सह + ऊष्मणा | = सहोष्मणा | - गुणसन्धि: |
| तदपि + अपाकीर्ण | = तदप्यपाकीर्ण | - यणादेशसन्धि: |
| तत् + अपि | = तदपि | - जश्त्वसन्धि: |

## ७. समासाः

| | | |
|---|---|---|
| अजिनाषाढधर: | - अजिनाषाढयो: धर: | - षष्ठीतत्पुरुषसमास: |
| प्रगल्भवाक् | - प्रगल्भा वाक् यस्य स: | - बहुव्रीहिसमास: |
| अनुज्झित: | - न उज्झित: | - नञ् तत्पुरुषसमास: |
| अनुज्झितक्रम: | - अनुज्झित: क्रम: येन स: | - बहुव्रीहिसमास: |
| धर्मसाधनम् | - धर्मस्य साधनम् | - षष्ठीतत्पुरुषसमास: |
| मनीषा | - मनस: ईषा | - षष्ठीतत्परुषसमास: |
| मनीषिण: | - मनीषा एषाम् अस्तीति | - बहुव्रीहिसमास: |
| उपपन्नचापल: | - उपपन्नं चापलं यस्य स: | - बहुव्रीहिसमास: |
| सुभ्रू: | - शोभने भ्रुवौ यस्या: सा | - बहुव्रीहिसमास: |
| देवभूमय: | - देवानां भूमय: | - षष्ठीतत्पुरुषसमास: |
| द्विजन्मा | - द्वे जन्मनी यस्य स: | - बहुव्रीहिसमास: |
| उष्णवारणम् | - उष्णस्य वारणम् | - षष्ठीतत्पुरुषसमास: |
| पिनाकपाणि: | - पिनाकं पाणौ यस्य स: | - बहुव्रीहिसमास: |
| तस्य अवाप्ति: | - तदवाप्ति: | - षष्ठीतत्पुरुषसमास: |
| अमङ्गलम् | - न मङ्गलम् | - नञ् तत्पुरुषसमास: |

# ३ भर्तृहरिसुभाषितानि

भर्तृहरिः

## परिचयः

भर्तृहरिमहाकविः शकपुरुषस्य विक्रमार्कस्य भ्राता इति काचित् कथा श्रूयते। अतोऽयं महाकविः विक्रमार्कशकारम्भे आसीत् इति ज्ञायते। अनेन लिखितानि सुभाषितानि प्रत्येकरूपेण वर्तन्ते। एकस्य श्लोकस्य अन्येन श्लोकेन सह सम्बन्धः नास्ति। अतः एव मुक्तकाः इति कथ्यन्ते। अनेन महाकविना सुभाषितत्रिशतीति काव्यं व्यरचितम्। तत्काव्यं नीति-शृङ्गार-वैराग्यशतकरूपेण विभक्तमासीत्। अस्य महाकवेः प्रतिभा नितरां विलसति। अत्र नक्षत्राङ्किताः(✻) श्लोकाः कण्ठस्थीकरणीयाः।

### पाठ्यभागः

१. **बोद्धारो मत्सरग्रस्ताः**
**प्रभवः स्मयदूषिताः।**
**अबोधोपहताश्चान्ये**
**जीर्णमङ्गे सुभाषितम् ॥**

२. **स्वायत्तमेकान्तहितं विधात्रा**
**विनिर्मितं छादनमज्ञतायाः।**
**विशेषतः सर्वविदां समाजे**
**विभूषणं मौनमपण्डितानाम् ॥**

३. अम्बोजिनीवनविहारविलासमेव
हंसस्य हन्ति नितरां कुपितो विधाता।
न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां
वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः ॥

४. जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गतिः कथय किं न करोति पुंसाम् ॥

*५. जयन्ति ते सुकृतिनो
रससिद्धाः कवीश्वराः।
नास्ति येषां यशः काये
जरामरणजं भयम् ॥

६. परिवर्तिनि संसारे
मृतः को वा न जायते।
स जातो येन जातेन
याति वंशस्समुन्नतिम् ॥

७. कुसुमस्तबकस्येव
द्वयीवृत्तिर्मनस्विनः।
मूर्ध्नि वा सर्वलोकस्य
शीर्यते वन एव वा॥

८. सिंहः शिशुरपि निपतति
मदमलिनकपोलभित्तिषु गजेषु ।
प्रकृतिरियं सत्त्ववतां
न खलु वयस्तेजसां हेतुः ॥

*९. दानं भोगो नाशः तिस्रो
गतयो भवन्ति वित्तस्य।
यो न ददाति न भुङ्क्ते
तस्य तृतीयागतिर्भवति॥

१०. अकरुणत्वमकारणविग्रहः
परधने परयोषिति च स्पृहा।
सुजनबन्धुजनेष्वसहिष्णुता
प्रकृतिसिद्धमिदं हि दुरात्मनाम् ।

*११. दुर्जनः परिहर्तव्यो विद्ययाऽलङ्कृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः॥

१२. न कश्चिच्चण्डकोपानां आत्मीयो नाम भूभुजाम्।
होतारमपि जुह्वानं स्पृष्टो दहति पावकः॥

*१३. आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमुपैति पश्चात्।
दिनस्य पूर्वार्धपरार्धभिन्ना
छायेव मैत्री खलसज्जनानाम् ॥

१४. विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरतिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥

*१५. संपत्सु महतां चित्तम् भवेदुत्पलकोमलम् ।
आपत्सु च महाशैलशिलासंघातकर्कशम् ॥

१६. पापान्निवारयति योजयते हिताय
गुह्यं निगूहति गुणान् प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः॥

१७. मनसि वचसि काये पुण्यपीयूषपूर्णाः
त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः।
परागुणपरमाणून् पर्वतीकृत्य नित्यं
निजहृदि विकसन्तः सन्ति सन्तः कियन्तः॥

१८. कदर्थितस्यापि हि धैर्यवृत्तेः
न शक्यते धैर्यगुणः प्रमार्ष्टुम्।
अधोमुखस्यापि कृतस्य वह्नेः
नाधः शिखा याति कदाचिदेव॥

१९. छिन्नोऽपि रोहति तरुः क्षीणोऽप्युपचीयते पुनश्चन्द्रः।
इति विमृशन्तस्सन्तः सन्तप्यन्ते न विप्लुता लोके॥

*२०. वने रणे शत्रुजलाग्निमध्ये
महार्णवे पर्वतमस्तके वा।
सुप्तं प्रमत्तं विषमस्थितं वा
रक्षन्ति पुण्यानि पुराकृतानि ॥

२१. लाङ्गूलचालनमधश्चरणावघातं
भूमौ निपत्य वदनोदरदर्शनं च ।
श्वा पिण्डदस्य कुरुते गजपुंगवस्तु
धीरं विलोकयति चाटुशतैश्च भुङ्क्ते॥

२२. राजन् दुधुक्षसि यदि क्षितिधेनुमेनां
तेनाद्य वत्समिव लोकममुं पुषाण।
तस्मिंश्च सम्यगनिशं परिपोष्यमाणे
नानाफलैः फलति कल्पलतेव भूमिः॥

२३. पद्माकरं दिनकरो विकचीकरोति
चन्द्रो विकासयति कैरवचक्रवालम्।
नाभ्यर्थितो जलधरोऽपि जलं ददाति
सन्तः स्वयं परहिते विहिताभियोगाः॥

२४. प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्यविघ्ननिहता विरमन्ति मध्याः।
विघ्नैर्मुहुर्मुहुरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमगुणा न परित्यजन्ति॥

२५. केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्तेऽखिलभूषणानि सततं वाग्भूषणं भूषणम् ॥

## अभ्यासः

### १. लघुसमाधानप्रश्नाः

१. पुराकृतानि कानि मानवान् रक्षन्ति ?
२. सततं भूषणं किम् ?
३. दुरात्मनां सहजलक्षणानि कानि ?
४. सन्मित्रलक्षणं किमिति सन्तः प्रवदन्ति ?

### २. एकपदसमाधानप्रश्नाः

१. सुभाषितत्रिशतीति काव्यं केन रचितम् ?
२. महतां चित्तं सम्पत्सु कथं भवेत् ?
३. धनस्य तृतीया गतिः का ?
४. विघ्नभयेन कार्यं कैः न प्रारभ्यते ?

#### विशेषतो ज्ञेयाः

### ३. कठिनशब्दार्थाः

प्रभवः - राजानः
बोद्धारः - पण्डिताः, बुधाः
भूषणम् - आभरणम्

| | | |
|---|---|---|
| छादनम् | - | आच्छादनम् |
| धियः | - | बुद्धयः |
| जाड्यम् | - | मौढ्यम् |
| अपाकरोति | - | नाशयति |
| तनोति | - | विस्तारयति |
| सुकृतिनः | - | सत्कार्यकर्तारः |
| असहिष्णुता | - | असहनशीलत्वम् |
| वित्तस्य | - | धनस्य |
| परिहर्तव्यः | - | त्याज्यः |
| दिनकरः | - | सूर्यः |
| जलधरः | - | मेघः |
| कैरवचक्रवालम् | - | कुमुदानां समूहः |
| जहाति | - | त्यजति |
| रोहति | - | वृद्धिं याति |
| उपचीयते | - | प्रवर्धते |
| महार्णवे | - | महासमुद्रे |

## व्याकरणांशाः

### ४. सन्धयः

| | | |
|---|---|---|
| महा + अर्णवः | = महार्णवः | - सवर्णदीर्घसन्धिः |
| कुपितः + विधाता | = कुपितो विधाता | - विसर्गसन्धिः |
| कुसुमस्तकबस्य + इव | = कुसुमस्तबकस्येव | - गुणसन्धिः |
| शिशुः + अपि | = शिशुरपि | - रेफादेशसन्धिः |
| चाटुशतैः + च | = चाटुशतैश्च | - श्चुत्वसन्धिः |

कल्पलता + इव = कल्पलतेव - गुणसन्धिः
वदन + उदरदर्शनम् = वदनोदरदर्शनम् - गुणसन्धिः

## ५. समासाः

| | | |
|---|---|---|
| मत्सरग्रस्ताः | -मत्सरेण ग्रस्ताः | - तृतीयतत्पुरुषसमासः |
| स्वायत्तम् | -स्वस्य आयत्तम् | - षष्ठीतत्पुरुषसमासः |
| अपण्डितानाम् | -न पण्डितानाम् | - नञ् तत्पुरुषसमासः |
| रससिद्धाः | -रसे सिद्धाः | - सप्तमीतत्पुरुषसमासः |
| कवीश्वराः | -कवयः च ते ईश्वराः च | - विशेषणोत्तरपदकर्मधारयसमासः |
| सुकृतिनः | -शोभनाः कृतयः येषां ते | - बहुव्रीहिसमासः |
| द्वयीवृत्तिः | -द्वयी च सा वृत्तिः | - विशेषणपूर्वपदकर्मधारयसमासः |
| अकरुणत्वम् | -न करुणत्वम् | - नञ् तत्पुरुषसमासः |
| उत्पलकोमलम् | -उत्पलम् इव कोमलम् | - उपमानपूर्वपदकर्मधारयसमासः |
| विघ्नभयेन | -विघ्नात् भयेन | - पञ्चमीतत्पुरुषसमासः |
| पद्माकरम् | -पद्मानाम् आकरम् | - षष्ठीतत्पुरुषसमासः |

## ६. पर्यायपदानि

प्रभुः - राजा, नृपतिः
जलधरः- मेघः, वारिवाहः
मैत्री - सख्यम्, स्नेहः
वाक् - वाणी, गीः, वचः
विद्वान् - पण्डितः, बुधः
सूर्यः - आदित्यः, दिनकरः, रविः, भास्करः, दिवाकरः
बुद्धिः - मतिः, धीः, मनीषा

# ४ नीतिश्लोकाः

विविधग्रन्थेभ्यः उद्धृताः श्लोकाः

## परिचयः

नयनं नाम नीतिः। अर्थात् सन्मार्गप्रापिका सच्छीलवर्धिका च पद्धतिः। **नानृषिः कुरुते काव्यम्** इति काचिदुक्तिः। अत्र विषयस्यैव प्राधान्यम् ,न तत् प्रतिपादककवेः। अत एव कवीनां वा, तैः विरचितानाम् उद्धृतश्लोकानां ग्रन्थानां वा परिचयाय नैव यत्नः क्रियते। एते च श्लोकाः स्वातन्त्र्येण भावबोधकाः। एषु परस्परसम्बन्धो न भवति। विद्यार्थिनां समग्रव्यक्तित्वविकासाय अवश्यम् उपकुर्युः इति आशास्महे। अत्र नक्षत्राङ्किताः(✻) श्लोकाः कण्ठस्थीकरणीयाः।

### पाठ्यभागः

✻१. **एकः स्वादु न भुञ्जीत नैकः सुप्तेषु जागृयात्।**
**एको न गच्छेत् अध्वानं नैकश्चार्थान् प्रचिन्तयेत्॥**

२. **सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम् ।**
**न नित्यं लभते दुःखं न नित्यं लभते सुखम् ॥**

३. **अकृत्यं नैव कर्तव्यं प्राणत्यागेऽपि संस्थिते ।**
**न च कृत्यं परित्याज्यम् एष धर्मः सनातनः॥**

*४. वेषं न विश्वसेत्प्राज्ञो वेषो दोषाय कल्पते।
रावणो भिक्षुरूपेण जहार जनकात्मजाम् ॥

५. माता समं नास्ति शरीरपोषणं
भार्या समं नास्ति शरीरतोषणम्।
विद्यासमं नास्ति शरीरभूषणं
चिन्तसमं नास्ति शरीरशोषणम्॥

६. उपार्जितानां वित्तानां त्याग एव हि रक्षणम् ।
तडागोदरसंस्थानां परीवाह इवाम्भसाम् ॥

*७. भुक्त्वा शतपथं गच्छेत् ताम्बूलं तदनन्तरम् ।
वामपार्श्वे तु शयनम् औषधैः किं प्रयोजनम् ॥

८. व्यवस्थितः प्रशान्तात्मा कुपितोऽप्यभयङ्करः।
अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्करः॥

९. विद्वानेव विजानाति विद्वज्जनपरिश्रमम्।
न हि वन्ध्या विजानाति गुर्वीं प्रसववेदनाम् ॥

१०. विद्या मित्रं प्रवासेषु भार्या मित्रं गृहेषु च ।
व्याधितस्यौषधं मित्रं धर्मो मित्रं मृतस्य च ॥

११. श्रावयेत् मृदुलां वाणीं सर्वदा प्रियमाचरेत्।
पित्रोराज्ञानुसारी स्यात् सत्पुत्रः कुलपावनः॥

१२. मनो मधुकरो मेघो मानिनी मदनो मरुत्।
मा मदो मर्कटो मत्स्यो 'म'कारा दश चञ्चलाः ।।

*१३. दरिद्राय कृतं दानं शून्यलिङ्गस्य पूजनम् ।
अनाथप्रेतसंस्कारम् अश्वमेधसमं विदुः ।।

१४. कर्ता कारयिता चैव प्रेरकश्चानुमोदकः ।
सुकृते दुष्कृते चैव चत्वारस्समभागिनः ।।

*१५ चला लक्ष्मीः चलाः प्राणाः चलं जीवितयौवनम् ।
चलाचले च संसारे धर्म एको हि निश्चलः ।।

१६. स्वभावं नैव मुञ्चन्ति सन्तः संसर्गतोऽसताम् ।
न त्यजन्ति रुतं मञ्जु काकसंपर्कतः पिकाः।।

१७. प्रथमवयसि पीतं तोयमल्पं स्मरन्तः
शिरसि निहितभारा ना रिकेला नराणाम्।
सलिलममृतकल्पं दद्युराजीवितान्तं
न हि कृतमुपकारं साधवो विस्मरन्ति ।।

१८. प्रत्यक्षे गुरवस्तुत्याः परोक्षे मित्रबान्धवाः।
कर्मान्ते दासभृत्याश्च न कदाचन पुत्रकाः ।।

१९. न देवो विद्यते काष्ठे न पाषाणे न मृण्मये ।
भावेषु विद्यते देवः तस्मात् भावो हि कारणम् ।।

२०. आमरणान्ताः प्रणयाः कोपाः तत्क्षणभङ्गुराः।
परित्यागाश्च निश्शंकाः भवन्ति हि महात्मनाम्।।

२१. जले तैलं खले गुह्यं पात्रे दानं मनागपि।
प्राज्ञे शास्त्रं स्वयं याति विस्तारं वस्तुशक्तितः ॥

२२. विद्याधनं श्रेष्ठतरं तन्मूलमितरं धनम् ।
दानेन वर्धते नित्यं न भाराय न नीयते॥

*२३. अपूज्या यत्र पूज्यन्ते पूज्यानां च व्यतिक्रमः।
त्रीणि तत्र भविष्यन्ति दुर्भिक्षं मरणं भयम् ॥

## अभ्यासः

### १. लघुसमाधानप्रश्नाः

१. एकः किं न कुर्यात् ?

२. चञ्चलाः मकाराः कति ? ते च के ?

३. किम् अश्वमेधेन समं विदुः ?

४. सुकृते दुष्कृते च समभागिनः के ?

### २. एकपदसमाधानप्रश्नाः

१. प्रवासेषु मित्रं किम् ?

२. श्रेष्ठं धनं किम् ?

३. कुलपावनः कः ?

४. प्रत्यक्षे स्तुत्याः के ?

## व्याकरणांशाः

### ३. सन्धयः

| | | |
|---|---|---|
| न + एकः | = नैकः | - वृद्धिसन्धिः |
| सुखस्य + अनन्तरम् | = सुखस्यानन्तरम् | - सवर्णदीर्घसन्धिः |
| न + एव | = नैव | - वृद्धिसन्धिः |
| त्यागे + अपि | = त्यागेऽपि | - पूर्वरूपसन्धिः |
| तडाग + उदर | = तडागोदर | - गुणसन्धिः |
| चल + अचले | = चलाचले | - सवर्णदीर्घसन्धिः |
| प्रसादे + अपि | = प्रसादेऽपि | - पूर्वरूपसन्धिः |
| कर्म + अन्ते | = कर्मान्ते | - सवर्णदीर्घसन्धिः |

# ५ अमरवाणीप्रशस्तिः

**श्रीमान् ई. शठकोपाचार्यः**

## परिचयः

अयं पाठ्यभागः सुरवाणीमणिहारः इत्यस्मात् ग्रन्थात् स्वीकृतः। सुरवाणीमणिहारः इत्ययं ग्रन्थः श्रीमद्भिः ई. शठकोपाचार्यमहोदयैः विरचितः। सुरवाणीमणिहारे प्रकरणानि सरोरूपेण विभक्तानि। अत्र च पद्यात्मकं कवित्वम्, गद्यात्मकं कवित्वम्, दृश्यात्मकं कवित्वम् इति त्रीणि सरांसि विद्यन्ते। तत्र कवितात्मकानि भागानि मणिरूपेण प्रकाश्यन्ते। अतः तासु सरस्सु स्थिताः मणयः पद्य-गद्य-दृश्यमणयः इति कविना विभक्तानि।

### पाठ्यभागपरिचयः

प्रकृते अमरवाणीप्रशस्तिः इति पाठ्यभागः प्रथमसरसि स्थितेषु दशसु पद्यमणिषु तृतीयस्थानम् अधितिष्ठति। श्रीमान् ई. शठकोपाचार्यमहोदयः आन्ध्रदेशीयः, आधुनिकः, संस्कृतकविपण्डितः प्रमुखेषु अन्यतमश्च। अयं सुरवाणीमणिहारः यथार्थतया सुरसरस्वत्याः कण्ठाभरणं भवत्येवेति विदुषामभिप्रायः। श्रीमतः ई. शठकोपाचार्यमहोदयस्य रचनारीतिः सरला सुन्दरा च सती सकलपाठकानां हृदयङ्गमा भवतीति-प्रशस्यते साहित्यविमर्शकैः।

### पाठ्यभागः

१. **मातः! गीर्वाणवाणि! त्वममरनगरीप्राङ्गणे ब्रह्ममुख्यैः**
**देवैस्संलाल्यमाना चिरमवनितले स्तूयमाना सुहृद्भिः ।**
**वाल्मीकिव्यासमुख्यैर्मुनिभिरनुदिनं कालिदासादिभिश्च**
**आनीतालङ्कारशोभा कविभिरनुपमा सन्तु नस्ते नमांसि ।।**

२. न खलु विबुधलोके मानवानां विहारः
न च सुररमणीभिस्सौख्यभोगप्रसक्तिः।
इति किल करुणार्द्रीभूतचित्ता स्वयं त्वं
धरणिममरवाणि! प्राप्य नाकीकरोषि॥

३. यदि विबुधनिवासात् नागता त्वं हि देवि!
भगवत इह तत्त्वं कोऽपि न ज्ञातवान् स्यात्।
कृतनिरयनिवासा उज्झितात्मस्वरूपा
जननमरणकूपे मानवाः पातिताः स्युः॥

४. तव जननि! जगत्यां प्राप्य सम्पर्कमन्याः
विधुमिव कुमुदिन्यो भान्ति भाषा नितान्तम्।
न भवति खलु शक्तस्त्वां विना कोऽपि वक्तुं
भवसि सकलभाषाजन्मदात्री यतस्त्वम्॥

५. प्रत्यक्षरं बहूनर्थानाश्रित्यामरभारति।
विराजसेऽनल्परत्नाद्याश्रयः सागरो यथा॥

६. निन्दन्तु केचिदनिशं भवतीं पुमांसः
मातस्तथाप्यपचयो न हि तेऽस्ति नूनम्।
उल्का दिवानिशमपि स्फुरतु प्रकामं
वारानिधिर्न खलु शुष्यति तावतासौ॥

७. को वाल्मीकिः कश्च वा कालिदासः
को वा व्यासो नास्ति चेत्तेऽनुकम्पा।
कालेऽतीतेऽप्यम्ब यत्तान् स्मरामः
दैवीवाक् ते सन्तनोति प्रभावम्॥

८. राकेटाख्यविमाननिर्मितिकलापारङ्गताः सन्तु वा
व्योम्नुड्डीय सुधांशुमण्डलमथो वेगेन ते यान्तु वा।
स्वर्गं वा सशरीरमेव मनुजा गच्छन्तु गीर्वाणवाक्
तत्राप्यम्ब! तव प्रसादमतुलं कांक्षेयुरुच्चैस्तमाम्॥

९. शमयसि भवतापं ब्रह्मविद्याप्रबोधैः
जनयसि हृदिमोदं कालिदासादिकाव्यैः।
गमयसि शुभमार्गे मानवान् धर्मसूत्रैः
जगति विबुधवाणि! त्वत्समा कास्ति मान्या॥

१०. कामं सन्तु सहस्रशो भुवि गिरः कस्ताभिरर्थोऽस्ति नः
शक्ता तोषयितुं त्वमेव मनुजान् शब्दैः सुधास्यन्दिभिः।
वर्षासु प्रवहन्तु नाम सरितः कूलङ्कषाः किं फलम्
ग्रीष्मे या पथिकान् नदी खलु जलैस्सन्तर्पयत्सोत्तमा॥

११. रे रे मानव! मारणायुधविनिर्माणे यदि श्राम्यसि
स्वात्मा किं भविता विचारय मनाक् तस्यैव विस्फोरणात्।
नेहूबोधितपञ्चशीलविषये यद्यस्ति वाञ्छा तव
अध्यात्मज्ञानविवर्धिनीं सुरगिरं भ्रातर्भजेस्सत्वरम्॥

# अभ्यासः

## १. निबन्धप्रश्नौ

१. शठकोपाचार्योक्तरीत्या 'अमरवाणीप्रशस्तिम्' विवृणुत।

२. 'अमरवाणीप्रशस्तिः' इत्यस्य पाठ्यभागस्य सारांशं लिखत।

## २. लघुसमाधानप्रश्नाः

१. कविभिः कीदृशी अलङ्कारशोभा आनीता ?

२. सकलभाषाजन्मदात्री का ?

३. विबुधवासात् अमरवाणी नागता चेत् तदा मानवाः किं भवेयुः ?

४. कालेऽतीतेऽपि कान् स्मरामः ?

## ३. एकपदसमाधानप्रश्नाः

१. अमरवाणी प्रशस्तिः केन विरचिता ?

२. नेहूबोधितः सिद्धान्तः कः ?

३. विबुधवाणी कैः भवतापं शमयति ?

४. अमरवाणी सर्वमानवान् शुभमार्गे कैः गमयति ?

## ४. सन्दर्भवाक्यानि

१. धरणिममरवाणि! प्राप्य नाकीकरोषि ।

२. विराजसेऽनल्परत्नाद्याश्रयः सागरो यथा ।

३. भवति सकलभाषाजन्मदात्री यतस्त्वम् ।

४. जगति विबुधवाणि! त्वत्समा कास्ति मान्या ।

## विशेषतो ज्ञेयाः

### ५. सन्धयः

| | | |
|---|---|---|
| काले + अतीते | = कालेऽतीते | - पूर्वरूपसन्धिः |
| तत्र + अपि | = तत्रापि | - सवर्णदीर्घसन्धिः |
| प्रति + अक्षरम् | = प्रत्यक्षरम् | - यणादेशसन्धिः |
| ते + अस्ति | = तेऽस्ति | - पूर्वरूपसन्धिः |
| सा + उत्तमा | = सोत्तमा | - गुणसन्धिः |
| व्योम्नि + उड्डीय | = व्योम्न्युड्डीय | - यणादेशसन्धिः |
| तस्य + एव | = तस्यैव | - वृद्धिसन्धिः |
| का + अस्ति | = कास्ति | - सवर्णदीर्घसन्धिः |
| कः + अपि | = कोऽपि | - पूर्वरूपसन्धिः |
| अपि + अम्ब | = अप्यम्ब | - यणादेशसन्धिः |

# ६ कपीनामुपवासः

**श्रीशैलं ताताचार्यः**

## परिचयः

कपीनामुपवासः इत्ययं पाठ्यांशः मीमांसार्णव-मीमांसाकेसरिबिरुदाङ्कितानां श्रीशैलताताचार्याणां काव्यसंग्रहात् उद्धृतः। श्रीताताचार्याः डि.टि.ताताचार्य इति नाम्नापि प्रसिद्धाः। एते तंजावूर् मण्डले तिरुवडिसंस्कृतकलाशालायां प्राचार्याः आसन्। संस्कृतस्य ग्रन्थलेखनविषये एते प्रसिद्धाः। तैः काव्यालङ्कारः, मुग्धाञ्जलिः इति काव्यद्वयं लिखितम्।

### पाठ्यभागपरिचयः

अत्र परस्परस्पर्धया कपयः मानवानां महत्त्वं वीक्ष्य स्वस्य उन्नतत्वमपि परिगणय्य मानवा इव वयमपि उपवासव्रतं कुर्म इति एकादश्याम् उपवासः आरब्धाः। दिनावसाने एते बुभुक्षापीडिताः। क्रमशः स्वकीयं व्रतं त्यक्त्वा फलभक्षकाः आसन्। हास्यव्यङ्ग्येऽस्मिन् इतरेषाम् अनुकरणं कदापि न करणीयम् इति उपदेशः प्रधानतया वर्णितः।

**१. पुरा कदाचित् कपिसार्वभौमः**
**कश्चित्समाहूय जनान् स्वकीयान्।**
**प्रवर्त्य सम्मेलनमात्मनीनाम्**
**उवाच वाचं वदतां वरेण्यः॥**

**२. ज्ञातं हि वो वानरवंशवृद्धाः**
**प्राञ्चो यदस्मात्कुलजा महान्तः।**
**शौर्येण वीर्येण च विद्यया च**
**लोकत्रयेऽपि प्रथिता बभूवुः॥**

३. उदन्वदुल्लङ्घनलब्धवर्णो
लङ्कापुरीदाहलसत्प्रतापः।
श्रीमान् नवव्याकरणप्रवीणो
जज्ञे हनूमान् स च कुत्र वंशे॥

४. किं तावदस्मासु न विद्यते
यन्मनुष्यजातेरवरा भवेम।
किं वा मनुष्येष्वधिकं चकास्ति
यतः प्रकृष्येत मनुष्यवर्गः॥

५. इतीरयित्वा गिरमर्थयुक्तां
तूष्णीं भवन् वानरवावदूकः।
वाग्मित्वदर्पोद्धतधीरमन्दं
सभां समन्तात् क्षणमालुलोके॥

६. स्वोत्कर्षवाचा विकसन्मुखानां
प्लवङ्गमानां विविधाङ्गहारैः।
प्रोत्साहितोऽसौ प्लवगाधिराजः
प्रीतः पुनर्धीरमुवाच वाचम्॥

७. तदद्य मान्याः परिचिन्तयध्वं
धर्मेषु शास्त्रैरुपदर्शितेषु।
मनुष्यवर्गस्य यथाऽधिकारस्तथा
किमस्मत्कुलजस्य न स्यात्॥

८. चिरप्रलीनोऽपि स सम्प्रदायो
नूनं भवद्भिः परिपालनीयः।
धर्मव्यपाये हि मृगत्ववादः
प्रवर्तितोऽस्मासु भवेन्निरूढः।।

९. तात्कालिकं क्लेशमतः सहद्भिः
निधीयतां धीः स्थिरधर्ममार्गे।
एकादशी श्वो भविता तदानीम्
उपोष्य धर्मं प्रथमं कुरुध्वम्।।

१०. शाखामृगाणामिति चक्रवर्ती
निषिच्य कर्णेष्वमृतं कपीनाम्।
सन्तोषचिह्नैर्बहुधोपलक्ष्मैः
तेषां प्रहृष्यन् विरतो बभूव।।

११. कीच्कारसान्द्रां प्लुतभेददृश्यां
तस्यार्हणां प्रेममयीं प्रवाचः।
कृत्वोपवासे कृतनिश्चियास्ते
मुदा ययुर्मानुषसाम्यहृष्टाः।।

१२. अथ प्रभाते किल जागरित्वा
नदीजलस्नानपवित्रताङ्गाः।
निधाय रामं हृदि तेऽभिरामं
सङ्कल्पयामासुरुपोषणाय।।

१३. अथ क्षणार्धं निभृतं स्थितानां
परस्परप्रेक्षणतत्पराणाम्।
हृदीव गात्रेऽपि बभूव लौल्यं
प्रभुः स्वभावं व्यतिवर्तितुं कः॥

१४. विधाय जृम्भां व्यवधूय हस्तं
प्रसार्य पादं परिवर्त्य गात्रम्।
आचुम्ब्य पुच्छाग्रमसोढकण्डूः
अन्ते कपिः कोऽपि बिभेद मौनम्॥

१५. असंशयं सम्प्रति पालनीयं
व्रतं महापुण्यमिदं महान्तः।
तथाऽपि जम्बूद्रुममूलभाजां
श्वः पारणा नः सुकरेति भाति॥

१६. इत्येवमुक्तं स्वगुणानुरूपं
कीशेन तेन प्रतिमोदमानाः।
स्थिरासनक्लेशविनाशतोषात्
कीशाः परे तुल्यमिति प्रणेदुः॥

१७. तथाऽस्तु को दोष इह स्थिताश्चेत्
व्रतोपवासश्रमपीडिताङ्गाः।
वृक्षान् प्रति प्रातरितः प्रयातुं
प्रायेण शक्ता न वयं भवेम॥

१८. इत्थं विनिश्चित्य तटात्तटिन्याः
स्वच्छन्दमुत्प्लुत्य विचेष्टमानाः।
आसाद्य जम्बूद्रुममूलदेशम्
आबध्य पंक्तिं हरयो निषेदुः।।

१९. तथा स्थितास्ते क्षणिकानुबद्धैः
उद्वीक्षणैर्विष्वगवेक्षणैश्च।
कण्डूयनैश्शीघ्रतमैश्च कांश्चित्
क्षणान् कथञ्चित् क्षपयां बभूवुः।।

२०. अथोत्थितः कश्चिदलुप्तधैर्यः
कपिः कपीन्द्रान् कथयाम्बभूव।
आरुह्य वृक्षं यदि संविशेम
का नः क्षतिस्तत्र भविष्यतीति।।

२१. व्रतस्य हानिर्न हि काचिदस्ति
तत्रेत्युरीकृत्य तदप्यमी द्राक्।
आरुह्य वृक्षं विततासु तस्थुः
शाखासु तस्य व्रतिनः कपीन्द्राः।।

२२. तत्रैकतो जोषमवस्थितानां
निर्बन्धजातद्विगुणश्रमाणाम्।
आभक्षणध्याननिरन्तराणां
क्षणः क्षणोऽदृश्यत कल्पदीर्घः।।

२३. वातेरिताभ्यो द्रुमशाखिकाभ्यः
सशब्दपातीनि रसोल्बणानि।
फलानि दृश्यानि निरीक्ष्य निर्यत्
दन्तोदकानां क्षुभितं मनोऽभूत्॥

२४. फलानुपातिस्वमनोरथेषु
ह्रीयन्त्रणान्मौनमभञ्जयत्सु।
सर्वेषु कश्चित् प्रतिलभ्य धैर्यं
सर्वाशयं स्वाशयवज्जगाद॥

२५. प्रकल्पिता सर्वविदा विधात्रा
कपोलयोरस्ति हि भस्त्रिका नः।
तां पूरयेमाद्य फलैरदुष्टैः
नास्तां फलान्वेषणसङ्कटं श्वः॥

२६. तथेत्यथोत्प्लुत्य हरिप्रवीराः
शाखोपशाखासु परिभ्रमन्तः।
फलैरशुष्कैः परिपाकरम्यैः
अपूरयन्नाननकन्दराणि॥

२७. ततः परं यत् करणीयमत्र
न किञ्चिदन्योन्यनिवेद्यमासीत्।
तस्माच्चरन्तः कपयो यथेच्छं
जहुर्लिखन्तीं किल लेखिनीं नः॥

# अभ्यासः

## १. निबन्धप्रश्नौ

१. कपयः वानरकुलस्य महत्त्वं कथं वर्णितवन्तः?

२. उपवासदीक्षिताः कपयः कथं बुभुक्षापीडिताः?

## २. लघुसमाधानप्रश्नाः

१. कोऽपि कपिः कथं मौनं बिभेद ?

२. वृक्षाणाम् आरोहणं कर्तुं कपयः कथं शक्ताः न भवन्ति?

३. कपीनां लौल्यं कथं जातम्?

४. उपवासे कपिः किं कृतवान्?

## ३. एकपदसमाधानप्रश्नाः

१. कः लङ्कां दग्धवान्?

२. कैः प्लवगाधिराजः प्रोत्साहितः?

३. कपीनामुपवासः केन विरचितः ?

४. कपिभिः कस्मिन् दिने उपवासः कृतः?

## ४. सन्दर्भवाक्यानि

१. जज्ञे हनूमान् स च कुत्र वंशे।

२. यतः प्रकृष्येत मनुष्यवर्गः।

३. उपोष्य धर्मं प्रथमं कुरुध्वम्।

४. प्रायेण शक्ता न वयं भवेम।

## विशेषतो ज्ञेयाः

### ५. कठिनशब्दार्थाः

| | |
|---|---|
| उदन्वदुल्लङ्घनलब्धवर्णः | - सागरतरणप्राप्तकीर्तिः |
| अवराः | - अधमाः |
| वावदूकः | - वाचालः |
| समन्तात् | - परितः |
| अङ्गहाराः | - चेष्टाः |
| उत्प्लुत्य | - कूर्दयित्वा |
| मुदा | - सन्तोषेण |
| उपोषणम् | - आहारत्यागः |
| कीशः | - वानरः |
| तटिन्याः | - नद्याः |
| क्षिपयां बभूवुः | - अगमयन् |
| ऊरीकृत्य | - अङ्गीकृत्य |
| द्राक् | - तत्क्षणम् |
| जोषम् | -तूष्णीम् |
| भस्त्रिकाः | - उदरम् |
| जह्रुः | - विहरणं कृतवन्तः |

### ६. सन्धयः

| | | |
|---|---|---|
| मनुष्येषु + अधिकम् | = मनुष्येष्वधिकम् | - यणादेशसन्धिः |
| इति + ईरयित्वा | = इतीरयित्वा | - सवर्णदीर्घसन्धिः |
| स्व + उत्कर्षवाचा | = स्वोत्कर्षवाचा | - गुणसन्धिः |

| | | |
|---|---|---|
| तस्य + अर्हणा | = तस्यार्हणा | - सवर्णदीर्घसन्धिः |
| गात्रे + अपि | = गात्रेऽपि | - पूर्वरूपसन्धिः |
| इति + एवम् | = इत्येवम् | - यणादेशसन्धिः |
| तथा + अस्तु | = तथास्तु | - सवर्णदीर्घसन्धिः |
| सर्व + आशयम् | = सर्वाशयम् | - सवर्णदीर्घसन्धिः |
| शाखा + उपशाखासु | = शाखोपशाखासु | - गुणसन्धिः |

## ७. पर्यायपदानि

१. कपिः - वानरः - कीशः - शाखामृगः - हरिः - प्लवगः - प्लवङ्गः

२. वृक्षः - द्रुमः - पादपः - शाखी

# गद्यभागः


१. कपिञ्जलोपदेशः - बाणभट्टः

२. भोजस्य औदार्यम् - बल्लालः

३. शश-कपिञ्जलकथा - विष्णुशर्मा

४. श्रीमलयाळस्वामी - संस्कृतभाषासेवा - समुद्राललक्ष्मणय्य

५. स्वेदस्य पुष्पाणि - डा.माधवीजोषी

६. वर्षापरिदेवनम् - म.म. आचार्य-गुल्लपल्लि.श्रीरामकृष्णमूर्तिः

# गद्यभागः...

# १ कपिञ्जलोपदेशः

**बाणभट्टः**

## परिचयः

संस्कृतवाङ्मये गद्यमयानि पद्यमयानि तदुभयमयानि च काव्यानि बहूनि लभ्यन्ते। तत्र वाल्मीकिना विरचितं श्रीमद्रामायणं प्रथमं पद्यकाव्यं भवति। कालिदासादयः वाल्मीकिमनुसृत्य पद्यकाव्यानि रचयामासुः। गद्यकाव्यानि बहूनि सन्ति। तेषु बाणभट्टविरचितं कादम्बरीकाव्यं श्रेष्ठतमं भवति। **'गद्यं कवीनां निकषं वदन्ति'** इति गद्यरचनायाः वैशिष्ट्यम् अभिवर्णितम्। **'कादम्बरी रसज्ञानां आहारोऽपि न रोचते'** इति विद्वांसः कादम्बरीं बहुधा प्रशशंसुः। अयं बाणभट्टः सप्तमशताब्द्यां श्रीहर्षचक्रवर्तिनः आस्थाने आसीत्। अनेन श्रीहर्षस्य जीवितमाधारीकृत्य हर्षचरितं च रचितम्। **'वाणी बाणो बभूव'** इत्यादि वचनानि बाणस्य कवित्वसौन्दर्यं ख्यापयन्ति।

**कपिञ्जलोपदेशः** इति पाठ्यभागः बाणभट्टविरचितात् कादम्बरीकाव्यात् संगृहीतः। अत्र पुण्डरीकमुद्दिश्य तन्मित्रेण कपिञ्जलेन विहितः सदुपदेशः निबद्धोऽस्ति। पुण्डरीकः एकदा महाश्वेता इति गन्धर्वकन्यायामनुरक्तः आसीत्। तस्मिन् समये कपिञ्जलः तस्य सन्मार्गम् उपदिशति। अयमेव पाठ्यभागस्य विषयः।

लोके सत्कार्यं वा दुष्कार्यं वा कर्तुं यस्य कस्यापि जनस्य साहाय्यमावश्यकम्। यदि सः जनः सन्मित्रं भवेत् तर्हि सोऽस्माभिः सत्कार्याणि कारयति। यदि दुरात्मा भवेत् दुष्कार्यं कर्तुं प्रेरयति। अत एव मानवैः सदा सज्जनैस्सह सङ्गतिः कर्तव्या।

हंसः गन्धर्वराजः। सः हेमकूटे निवसति स्म। सः गौरी नाम्नीम् अप्सरसम् उवोढ। तयोः दाम्पत्यं रतीमन्मथाविव अनुकूलमासीत्। तयोः महाश्वेता नाम कन्या उदभूत्। सा महाश्वेता स्वबाल्यं सन्तोषेण अक्लेशेन च यापितवती। कालक्रमेण सा यौवनं प्राप्ता। एवं स्थिते वसन्तर्तुः आगतः। तदा महाश्वेता स्वमात्रा सह स्नानार्थम् अच्छोदसरः जगाम। स्नानानन्तरं तत्रत्येषु लतागृहेषु सखीभिस्सह सा विजहार।

तदा सा दिव्येन अपूर्वपरिमलेन आकृष्टचित्ता अभवत्। कुतोऽयं परिमल इति अन्विष्यमाणा किञ्चित् दूरं गत्वा स्नानार्थमागतम् एकं मुनिकुमारमपश्यत्। सः मुनिकुमारः सुन्दरः युवकश्चासीत्। तस्य कर्णे एकः कुसुमस्तबकः आसीत्। तादृशं कुसुमस्तबकं महाश्वेता इतः पूर्वं न कदापि अद्राक्षीत्। पुण्डरीकः महासौन्दर्यवतीं महाश्वेतां दृष्ट्वा तस्यां बद्धानुरागो बभूव। तस्मिन्नेव समये तस्य मित्रं कपिञ्जलो नाम द्वितीयः मुनिकुमारः पूजायै कुसुमानि लवित्वा आनीतवान्। तपोजपादिनियमेषु असंलग्नं महाश्वेतानिहितचित्तं स्वमित्रं पुण्डरीकं दृष्ट्वा कपिञ्जलः तं सन्मार्गे प्रवर्तयितुम् एवमुपदिदेश।

सखे! पुण्डरीक! नैतदनुरूपं भवतः। क्षुद्रजनक्षुण्ण एष मार्गः। धैर्यधना हि साधवः। किं यः कश्चित् प्राकृत इव विक्लीभवन्तम् आत्मानं न रुणत्सि? कुतस्तव अपूर्वोऽयम् अद्य इन्द्रियोपप्लवः? येनास्येवं कृतः? क्व ते तद्धैर्य्यम्? क्वासाविन्द्रियजयः? क्व तद्वशित्वं चेतसः? क्व सा प्रशान्तिः? क्व तत् कुलक्रमागतं ब्रह्मचर्यम्? क्व सा सर्वविषयनिरुत्सुकता? क्व ते गुरूपदेशाः? क्व तानि श्रुतानि? क्व ता वैराग्यबुद्धयः? क्व तदुपयोगविद्वेषित्वम्? क्व सा सुखपराङ्मुखता? क्वासौ तपस्यभिनिवेशः? क्व सा संयमिता? क्व सा भोगानामुपर्यरुचिः? क्व तद्यौवनानुशासनम्? सर्वथा निष्फला प्रज्ञा, निर्गुणो धर्मशास्त्राभ्यासः, निरर्थकः संस्कारः, निरुपकारको गुरूपदेशविवेकः, निष्प्रयोजना

प्रबुद्धता, निष्कारणं ज्ञानम्, यदत्र भवादृशा अपि रागाभिषङ्गैः कलुषीक्रियन्ते प्रमादैश्चाभिभूयन्ते। कथं करतलाद्गलितामपहृतामक्षमालामपि न लक्षयसि? अहो! विगतचेतनत्वम्। अपहृता नामेयम्, इयमपि तावदपह्रियमाणम् अनया अनार्यया निवार्यतां हृदयम्।

पुण्डरीकोऽपि स्वयं चाञ्चल्यमङ्गीकृत्य महाश्वेतायाः सौन्दर्येण आकृष्टहृदयोऽस्मीति उवाच। किञ्च, सखे! कपिञ्जल! विदितवृत्तान्तोऽपि किं मां पृच्छसि इति कृच्छ्रेन शनैः शनैः अवदत्। तदनु कपिञ्जलः पुनः तं कामावेशात् निवर्तयितुम् एवम् उवाच ।

सखे! पुण्डरीक! सुविदितमेतत् मम, केवलमिदमेव पृच्छामि - यदेतदारब्धं भवता, किमिदं गुरुभिरुपदिष्टम्? उत धर्मशास्त्रेषु पठितम्? उत धर्मार्जनोपायोऽयम्? उत अपरः तपसां प्रकारः? उत स्वर्गगमनमार्गोऽयम्? उत व्रतरहस्यमिदम्? उत मोक्षप्राप्तियुक्तिरियम्? अहोस्विदन्यो नियमप्रकारः? कथमेतद् युक्तं भवता मनसापि चिन्तयितुम्? किं पुनराख्यातुमीक्षितुं वा? कथय किम् अप्रबुद्ध इवानेन मन्मथहतकेनोपहासास्पदतां नीयमानमात्मानं नावबुध्यसे? मूढो हि मदनेनायास्यते। क्व वा सुखाशा साधुजननिन्दितेष्वेवं विधेषु प्राकृतजनबहुमतेषु विषयेषु भवतः? स खलु धर्मबुध्या विषलतावनं सिञ्चति, कुवलयमालेति निस्त्रिंशलतामालिङ्गति, कृष्णागुरुधूमलेखेति कृष्णसर्पमवगूहते, रत्नमिति ज्वलन्तमङ्गारमभिस्पृशति, मृणालमिति दुष्टवारणदन्तमुसलम् उन्मूलयति, मूढो विषयोपभोगेष्वनिष्टानुबन्धिषु यः सुखबुद्धिमारोपयति। अधिगतविषयतत्त्वोऽपि कस्मात् खद्योत इव ज्योतिर्निवार्यमिदं ज्ञानमुद्वहसि, यतो न निवारयसि प्रबलरजःप्रसरकलुषितानि स्रोतांसीव उन्मार्गप्रस्थितानि इन्द्रियाणि न नियमयसि च क्षुभितं मनः। कोऽयमनङ्गो नाम? धैर्यमवलम्ब्य निर्भर्त्स्यतामयं दुराचारः इति।

## अभ्यासः

### १. निबन्धप्रश्नौ

१. पुण्डरीकमुद्दिश्य कपिञ्जलः किम् उपदिदेश ?

२. कामावेशात् निवर्तयितुं पुण्डरीकं प्रति कपिञ्जलः किमुवाच ?

### २. लघुसमाधानप्रश्नाः

१. कपिञ्जलः कस्मिन् संदर्भे पुण्डरीकं प्रति उपदेशवचनानि अवदत् ?

२. पुण्डरीकः किमर्थं विचारग्रस्थः बभूव ?

३. पुण्डरीकः कया आकृष्टहृदयः आसीत् ?

४. कपिञ्जलोपदेशः कस्मात् ग्रन्थात् स्वीकृतम् ?

### ३. एकपदसमाधानप्रश्नाः

१. धैर्यधनाः के ?

२. महाश्वेता का ?

३. कपिञ्जलः कः ?

४. बाणः कस्य आस्थाने आसीत् ?

### ४. सन्दर्भवाक्यानि

१. धैर्य धना हि साधवः।

२. निरर्थकः संस्कारः।

३. मूढो हि मदनेन आयास्यते।

४. अहो विगतचेतनत्वम्।

## विशेषतो ज्ञेयाः

### ५. कठिनशब्दार्थाः

| | | |
|---|---|---|
| अनुरूपम् | - | उचितम् |
| रुणत्सि | - | वारयसि |
| संयमिता | - | निग्रहः |
| मदनः | - | मन्मथः |
| प्रबुद्धता | - | विवेकः |
| प्रकारः | - | पद्धतिः |
| अङ्गारम् | - | अग्निकणम् |
| क्षुभितम् | - | कलुषितम् |
| अभिभूयन्ते | - | तिरस्क्रियन्ते |

## व्याकरणांशाः

### ६. सन्धयः

| | | |
|---|---|---|
| न + एतत् | = नैतत् | - वृद्धिसन्धिः |
| तव + अपूर्वः | = तवापूर्वः | - सवर्णदीर्घसन्धिः |
| गुरु + उपदेशः | = गुरूपदेशः | - सवर्णदीर्घसन्धिः |
| आर्जन + उपायः | = आर्जनोपायः | - गुणसन्धिः |
| माम + इयम् | = मामेयम् | - गुणसन्धिः |
| कः + अयम् | = कोऽयम् | - विसर्गसन्धिः |

| | | |
|---|---|---|
| मनसा + अपि | = मनसापि | - सवर्णदीर्घसन्धिः |
| तपसि + अभिनिवेशः | = तपस्यभिनिवेशः | - यणादेशसन्धिः |

## ७. समासाः

| | | |
|---|---|---|
| क्षुद्रजनक्षुण्णः | - क्षुद्रजनैः क्षुण्णः | - तृतीयातत्पुरुषसमासः |
| कुलक्रमागतम् | - कुलक्रमात् आगतम् | - पञ्चमीतत्पुरुषसमासः |
| विगतचेतनः | - विगतं चेतनं यस्य सः | - बहुव्रीहिसमासः |
| आकृष्टहृदयः | - आकृष्टं हृदयं यस्य सः | - बहुव्रीहिसमासः |
| गुरूपदेशः | - गुरूणाम् उपदेशः | - षष्ठीतत्पुरुषसमासः |
| कपिञ्जलोपदेशः | - कपिञ्जलस्य उपदेशः | - षष्ठीतत्पुरुषसमासः |

# २ भोजस्य औदार्यम्

श्रीबल्लाल:

## परिचय:

प्रकृत: पाठ्यभाग: भोजप्रबन्धात् संगृहीत:। भोजप्रबन्ध: बल्लालकविना समालिखित:। कवेरस्य बल्लालसेन:, वल्लभदेवश्चेत्यादि नामान्तराणि विद्यन्ते। सोऽयं बल्लालकवि: भोजनरेन्द्रस्य आस्थानसभां समलञ्चकारेति विमर्शका: मन्वते। कविपुङ्गवस्यास्य काल: एकादशशतकमिति चारित्रिका: निर्धारितवन्त:। भोजप्रबन्धेऽस्मिन् धारानगराधीशस्य भोजमहाराजस्य वैदुष्यम्, कविताप्रियता, कविजनपोषकत्वम्, प्रजारञ्जकपालनम्, वीर्यक्षमादिसुगुणा: साधु समुपवर्णिता:। प्रकृतपाठ्यांशे भोजनरपते: सुमहती वितरणशीलता समुपवर्णिता।

### पाठ्यभाग:

ततो मुञ्जे तपोवनं याते बुद्धिसागरं मुख्यामात्यं विधाय स्वराज्यं बुभुजे भोजराजनृपति:। एवमतिक्रामति काले कदाचिद्राज्ञा क्रीडोद्यानं गच्छता कोऽपि धारानगरवासी विप्रो लक्षित:। स च राजानं वीक्ष्य नेत्रे निमील्यागच्छन् राज्ञा पृष्ट:-

'द्विज, त्वं मां दृष्ट्वा न स्वस्तीति जल्पसि। विशेषेण लोचने निमीलयसि। तत्र को हेतु: ? इति।

विप्र आह - 'देव! त्वं वैष्णवोऽसि। विप्राणां नोपद्रवं करिष्यसि। ततस्त्वत्तो न मे भीति:। किं तु कस्मैचित्किमपि न प्रयच्छसि। तेन तव दाक्षिण्यमपि नास्ति। अतस्ते किमाशीर्वचसा? किं च प्रातरेव कृपणमुखावलोकनात्परतोऽपि लाभहानि: स्यादिति

लोकोक्त्या लोचने निमीलिते। अपि च, देव! मत्पिता वृद्धः काशीं प्रति गच्छन्मया शिक्षां पृष्टः- 'तात! मया किं कर्तव्यमिति। पित्रा चेत्थमभ्यधायि-

**यदि तव हृदयं विद्वन्सुनयं स्वप्नेऽपि मा स्म सेविष्ठाः।**
**सचिवजितं षण्ढजितं युवतिजितं चैव राजानम्॥**

**पातकानां समस्तानां द्वे परे तात पातके।**
**एकं दुःसचिवो राजा द्वितीयं च तदाश्रयः॥**

**अविवेकमतिर्नृपतिर्मन्त्री गुणवत्सु वक्रितग्रीवः।**
**यत्र खलाश्च प्रबलास्तत्र कथं सज्जनावसरः॥**

**राजा सम्पत्तिहीनोऽपि सेव्यः सेव्यगुणाश्रयः।**
**भवत्याजीवनं तस्मात्फलं कालान्तरादपि॥**

अदातुर्दाक्षिण्यं न भवति। देव! पुरा कर्ण-दधीचि-शिबि-विक्रमप्रमुखाः क्षितिपतयो यथा परलोकमलङ्कुर्वाणा निजदानसमुद्भूतदिव्यनवगुणैः निवसन्ति महीमण्डले, तथा किमपरे राजानः?

**पण्डिते चैव मूर्खे च बलवत्यपि दुर्बले।**
**ईश्वरे च दरिद्रे च मृत्योः सर्वत्र तुल्यता॥**

**निमेषमात्रमपि ते वयो गच्छन्न तिष्ठति।**
**तस्माद्देहेष्वनित्येषु कीर्तिमेकामुपार्जयेत्॥**

राजापि तेन वाक्येन पीयूषपूरस्नात इव, परब्रह्मणि लीन इव, लोचनाभ्यां हर्षाश्रूणि मुमोच। प्राह च द्विजम्। विप्रवर! शृणु!

**सुलभाः पुरुषा लोके सततं प्रियवादिनः।**
**अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः॥**

इति विप्राय लक्षं दत्त्वा 'किं ते नाम? इत्याह। विप्रः स्वनाम भूमौ लिखति 'गोविन्दः' इति; राजा वाचयित्वा 'विप्र, प्रत्यहं राजभवनमागन्तव्यम्। न ते कश्चिन्निषेधः। विद्वांसः कवयश्च कौतुकात्सभामानेतव्याः। कोऽपि विद्वान् न दुःखभागस्तु, एनमधिकारं पालय, इत्याह।

एवं गच्छत्सु कतिपयदिवसेषु राजा विद्वत्प्रियो दानवित्तेश्वर इति प्रथामगात्। ततो राजानं दिदृक्षवः कवयो नानादिग्भ्यः समागताः। एवं वित्तादिव्ययं कुर्वाणं राजानं कदाचित् मुख्यामात्येन इत्थमभ्यधायि- 'देव! राजानः कोशबला एव विजयिनः, नान्ये।

**स जयी वरमातङ्गा यस्य कस्यास्ति मेदिनी।**
**कोशो यस्य स दुर्धर्षो दुर्गं यस्य स दुर्जयः।।** इति।

राजा च तमाह -

**दानोपभोगवन्ध्या या सुहृद्भिर्या न भुज्यते ।**
**पुंसां समाहिता लक्ष्मीरलक्ष्मीः क्रमशो भवेत् ।।**

इत्युक्त्वा राजा तं मन्त्रिणं निजपदाद्दूरीकृत्य तत्पदेऽन्यं निवेशयामास। आह च तत् -

**लक्षं महाकवेर्देयं तदर्धं विबुधस्य च ।**
**देयं ग्रामैकमर्धस्य तस्याप्यर्धं तदर्थिनः।।**

यश्च मेऽमात्यादिषु वितरणनिषेधमनाः स हन्तव्यः।

उक्तं च-

**यद्ददाति यदश्नाति तदेव धनिनां धनम् ।**
**अन्ये मृतस्य क्रीडन्ति दारैरपि धनैरपि ।।**

एवं वितरणशालिनं भोजराजं श्रुत्वा कश्चित् कलिङ्गदेशात् कविरुपेत्य मासमात्रं तस्थौ। न च क्षोणीन्द्रदर्शनं भवति। आहारार्थं पाथेयमपि नास्ति। ततः कदाचिद्राजा मृगयाभिलाषी बहिर्निर्गतः। स कविः दृष्ट्वा राजानमाह-

**दृष्टे श्रीभोजराजेन्द्रे गलन्ति त्रीणि तत्क्षणात् ।**
**शत्रोः शस्त्रं कवेः कष्टं नीवीबन्धो मृगीदृशाम् ॥**

राजा लक्षं ददौ। ततस्तस्मिन् मृगयारसिके राजनि कश्चन पुलिन्दपुत्रो गायति। तद्गीतमाधुर्येण तुष्टो राजा तस्मै पुलिन्दपुत्राय पञ्चलक्षं ददौ। तदा कविस्तद्दानं अत्युन्नतं किरातपोतं च दृष्ट्वा नरेन्द्रपाणिकमलस्थपङ्कजमिषेण राजानं वदति -

**एते हि गुणाः पङ्कज सन्तोऽपि न ते प्रकाशमायान्ति।**
**यल्लक्ष्मीवसतेस्तव मधुपैरुपभुज्यते कोशः॥**

भोजस्तमभिप्रायं ज्ञात्वा पुनर्लक्षमेकं ददौ। ततो राजा ब्राह्मणमाह -

**प्रभुभिः पूज्यते विप्र कलैव न कुलीनता ।**
**कलावान्मान्यते मूर्ध्नि सत्सु देवेषु शम्भुना ॥**

एवं वदति भोजे कुतोऽपि पञ्चषाः कवयः समागताः। तान् दृष्ट्वा राजा विलक्ष इवासीत्- 'अद्यैव मयैतावद्वित्तं दत्तम् इति। ततः कविस्तमभिप्रायं ज्ञात्वा नृपं पद्ममिषेण पुनः प्राह-

**किं कुप्यसि कस्मैचन सौरभसाराय कुप्य निजमधुने।**
**यस्य कृते शतपत्र प्रतिपत्रं तेऽद्य मृग्यते भ्रमरैः॥**

ततस्तुष्टो राजा पुनरपि कलिङ्गदेशवासिकवये लक्षं ददौ। ततः पूर्वकविः पुरःस्थितान् षट् कवीन्द्रान् दृष्ट्वा आह-

'हे कवयः, अत्र महासरः सेतुभूमौ वासी राजा यदा भवनं गमिष्यति तदा किमपि ब्रूत इति। ते च सर्वे महाकवयोऽपि सर्वं राज्ञः प्रथमचेष्टितं ज्ञात्वा अवर्तन्त। तेष्वेकः सरोमिषेण नृपं प्राह -

**आगतानामपूर्णानां पूर्णानामपि गच्छताम्।**
**यदध्वनि न संघट्टो घटानां तत्सरोवरम्॥** इति।

तस्य राजा लक्षं ददौ। ततो गोविन्दपण्डितः तान् कवीन्द्रान् दृष्ट्वा चुकोप। तस्य कोपाभिप्रायं ज्ञात्वा द्वितीयः कविराह-

**कस्य तृषं न क्षपयसि पिबति न कस्तव पयः प्रविश्यान्तः।**
**यदि सन्मार्गसरोवर नक्रो न क्रोडमधिवसति ॥**

राजा तस्मै लक्षद्वयं ददौ। तं च गोविन्दपण्डितं व्यापारपदात् दूरीकृत्य 'त्वयापि सभायामागन्तव्यम्, परन्तु केनापि दौष्ट्यं न कर्तव्यम् इत्युक्त्वा, ततस्तेभ्यः प्रत्येकं लक्षं दत्वा स्वनगरमागतः। ते च यथायथं गताः। ततः कदाचिद्राजा मुख्यामात्यं प्राह -

**विप्रोऽपि यो भवेन्मूर्खस्स पुराद्बहिरस्तु मे ।**
**कुम्भकारोऽपि यो विद्वान्स तिष्ठतु पुरे मम ॥** इति

अतः कोऽपि न मूर्खोऽभूत् धारानगरे। ततः क्रमेण पञ्चशतानि विदुषां वररुचि-बाण-मयूर-रेफण-हरिशङ्कर-कलिङ्ग-कर्पूर-विनायक-मदन-विद्या-विनोद-कोकिल-तारेन्द्रमुखाः सर्वशास्त्रविचक्षणाः सर्वे सर्वज्ञाः श्रीभोजराजसभामलंचक्रुः। एवं स्थिते कदाचित् विद्वद्बृन्दवन्दित-सिंहासनासीने कविशिरोमणौ कवित्वप्रिये विप्रप्रियबान्धवे भोजेश्वरे द्वारपाल एत्य प्रणम्य व्यजिज्ञपत् -

देवे! 'कोऽपि विद्वान् द्वारि तिष्ठति' इति।

अथ राज्ञा 'प्रवेश्यताम् इत्याज्ञप्ते सोऽपि दक्षिणेन पाणिना समुन्नतेन विराजमानो विप्रः प्राह - 'राजन्! अभ्युदयोऽस्तु'

राजा - 'शङ्करकवे! किं पत्रिकायामिदम्'?

कविः- 'पद्यम्'।

राजा - कस्य?

कविः- 'तवैव भोजनृपते'।

राजा - 'तत्पठ्यताम्'

कविः- 'पठ्यते'

**एतासामरविन्दसुन्दरदृशां द्राक्चामरान्दोलनात् ।**
**उद्वेल्लद्भुजवल्लिकङ्कणझणत्कारः क्षणं वार्यताम् ।।**

**यथा यथा भोजयशो विवर्धते सितां त्रिलोकीमिव कर्तुमुद्यतम् ।**
**तथा तथा मे हृदयं विदूयते प्रियालकालीधवलत्वशङ्कया ।।**

ततो राजा शङ्करकवये द्वादशलक्षं ददौ। सर्वे विद्वांसश्च विच्छायवदना बभूवुः। परं कोऽपि राजभयान्नावदत्। राजा च कार्यवशात् गृहं गतः।

## अभ्यासः

### १. निबन्धप्रश्नौ

१. भोजस्य औदार्यम् अधिकृत्य लिखत।

२. भोजमहाराजस्य यशः कीदृशमिति वर्णयत।

### २. लघुसमाधानप्रश्नाः

१. परलोकमलङ्कृतवन्तः क्षितिपतयः के ?

२. पुलिन्दपुत्रगानं शृत्वा भोजः कियत् धनं दत्तवान् ?

३. विद्वत्प्रियः भोजः किमिति प्रथामगात्?

४. धनिनां धनं किम्?

## ३. एकपदसमाधानप्रश्नाः

१. भोजस्य औदार्यम् इति पाठ्यभागः केन विरचितः?

२. भोजस्य मुख्यामात्यः कः?

३. भोजः शङ्करकवेः कियत् ददौ?

४. राजा किमर्थं बहिर्निर्गतः?

## ४. सन्दर्भवाक्यानि

१. यल्लक्ष्मीवसतेस्तव मधुपैरुपभुज्यते कोशः।

२. कुम्भकारोऽपि यो विद्वान् स तिष्ठतु पुरे मम।

३. अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः।

४. ईश्वरे च दरिद्रे च मृत्योः सर्वत्र तुल्यता।

### विशेषतो ज्ञेयाः

## ५. कठिनशब्दार्थाः

| | | |
|---|---|---|
| कृपणः | - | पिशुनः |
| पीयूषः | - | अमृतम् |
| वित्तेश्वरः | - | धनाधिपतिः |
| क्षोणीन्द्रः | - | राजा |
| विबुधः | - | पण्डितः |
| सुहृत् | - | मित्रम् |
| वितरणशालिनम् | - | दानगुणयुक्तम् |

## व्याकरणांशाः

### ६. सन्धयः

| | | |
|---|---|---|
| कदाचित् + राज्ञा | = कदाचिद्राज्ञा | - जश्त्वसन्धिः |
| लोक + उक्त्या | = लोकोक्त्या | - गुणसन्धिः |
| प्रबलाः + तत्र | = प्रबलास्तत्र | - विसर्गसन्धिः |
| सम्पत्तिहीनः + अपि | = सम्पत्तिहीनोऽपि | - विसर्गसन्धिः |
| सत् + जनः | = सज्जनः | - जश्त्वसन्धिः |
| सज्जन + अवसरः | = सज्जनावसरः | - सवर्णदीर्घसन्धिः |
| मुख्य + अमात्यः | = मुख्यामात्यः | - सवर्णदीर्घसन्धिः |
| कविः + उपेत्य | = कविरुपेत्य | - विसर्गसन्धिः |
| अपि + अर्धम् | = अप्यर्धम् | - यणादेशसन्धिः |

### ७. समासाः

| | | |
|---|---|---|
| स्वनाम | - स्वस्य नाम | - षष्ठीतत्पुरुषसमासः |
| नृपतिः | - नृणां पतिः | - षष्ठीतत्पुरुषसमासः |
| तपोवनम् | - तपसः वनम् | - षष्ठीतत्पुरुषसमासः |
| क्षितिपतयः | - क्षितेः पतयः | - षष्ठीतत्पुरुषसमासः |
| दिदृक्षवः | - द्रष्टुमिच्छा येषां ते | - बहुव्रीहिसमासः |
| विप्रवरः | - विप्रेषु वरः | - सप्तमीतत्पुरुषसमासः |
| भोजनृपतिः | - भोज इति नृपतिः | - सम्भावनापूर्वपदकर्मधारयसमासः |

# ३ शश-कपिञ्जलकथा
(पञ्चतन्त्रे काकोलूकीयम्)

## विष्णुशर्मा

### परिचयः

विष्णुशर्मा संस्कृतवाङ्मये नीतिकथासाहित्यस्य प्रमुखः स्रष्टा। अयं पञ्चमशताब्दीयः। अस्य जननीजनकौ जन्मस्थलं चेत्यादि वैयक्तिकसमाचारः नैव उपलभ्यते। परम् अयं कथाकथने सुतरां निपुणः। लोकज्ञानसम्पन्नः, सकलशास्त्रपारङ्गतः, छात्राणां कृते नैतिकांशानां बोधने असमानप्रतिभाशाली, सामाजिकसम्बन्धविश्लेषकश्च। जन्तूनां मुखतः मानवस्वभावानां निरूपकः अयम्, जन्तूनां, मानवानां च मनस्तत्त्ववेत्ता महान् राजनीतिकुशलश्चासीत्।

**पञ्चतन्त्ररचनायाः सन्दर्भः**

दक्षिणप्रान्ते महिलारोप्यं नाम नगरम् अमरशक्तिर्नाम राजा पालयति स्म। तस्य वसुशक्तिः उग्रशक्तिः अनेकशक्तिः इति नामानः परमदुर्मेधसः त्रयः पुत्राः आसन्। शास्त्रपराङ्मुखान् पुत्रान् पश्यतः अमरशक्तेः महदपि राज्यं न सौख्यम् आतनोति। राज्ञः बाधाम् दृष्ट्वा सचिवाः पुत्रान् ज्ञानसम्पन्नान् कर्तुं सकलशास्त्रपारङ्गतं लब्धकीर्तिं विष्णुशर्माणं अध्यापकत्वेन सूचितवन्तः। स राजा विष्णुशर्माणम् आहूय तस्य सकाशं सादरं तान् कुमारान् अध्ययनार्थं प्रेषितवान्। विष्णुशर्मा तेषां कृते मित्रभेद-मित्रप्राप्ति-काकोलूकीय-लब्धप्रणाश-अपरीक्षितकारकाणि चेति पञ्चतन्त्राणि विरच्य, तान् पाठितवान्। तेऽपि तानि अधीत्य मासषट्केन यथोक्ताः संवृत्ताः। ततः प्रभृति एतत् पञ्चतन्त्रं नाम नीतिशास्त्रं बालावबोधनार्थं भूतले प्रवृत्तम्। प्रमुखासु प्रपञ्चभाषासु अयम् अनूदितः इत्ययमेव पञ्चतन्त्रस्य प्रामुख्यं ज्ञापयति।

काकोलूकीयं पञ्चतन्त्रे तृतीयं तन्त्रम्। सहजवैरिणोः स्वभावः व्यवहारश्च काक-उलूकयोः मुखतः अत्र उपवर्णितः। अस्य तन्त्रस्य पठनेन वैरिषु कथं वा प्रवर्तेत? इति ज्ञानं जायते। जीवने ज्ञातव्याः अनेकाः अंशाः अत्र उपनिबद्धाः।

## पाठ्यांशस्य प्रस्तावना

प्रस्तुतपाठ्यभागः शश-कपिञ्जलकथा। काकः पक्षिणः उद्दिश्य कथाम् इमां कथयति। शशः मृगविशेषः। कपिञ्जलः पक्षिविशेषः। उलूकं राजानं कर्तुं पक्षिणः उत्सुकाः भूत्वा वने एकत्र समाविष्टाः। सन्नाहश्च समारब्धः। अत्रान्तरे कश्चन काकः तत्र समागतः। क्रियमाणः सन्नाहश्च तेन अवलोकितः। 'न्यायान्वेषणतत्परौ शशकपिञ्जलौ क्षुद्रम् अर्थपतिं प्राप्य यथा मृतौ तथा उलूकं राजानं कृत्वा वयमपि भवेम' इति इमां कथां प्रस्तौति।

## पाठ्यभागः

कस्मिंश्चित् वृक्षे पुरा अहम् (=काकः) अवसम्। तत्र अधस्तात् कोटरे कपिञ्जलो नाम चटकः प्रतिवसति स्म। अथ सदैव अस्तमनवेलायाम् आगतयोर्द्वयोः अनेकसुभाषितगोष्ठ्या, देवर्षि-ब्रह्मर्षि-राजर्षि-पुराणचरितकीर्तनेन च पर्यटनदृष्टान् अनेककौतूहलप्रकथनेन च परमसुखम् अनुभवतोः कालो व्रजति। अथ कदाचित् कपिञ्जलः प्राणयात्रार्थम् अन्यैः चटकैः सह अन्यं पक्वशालिप्रायं देशं गतः। ततो यावत् निशासमयेऽपि नायातः तावदहं सोद्वेगमनाः तद्वियोगदुःखितः चिन्तितवान्-

अहो किमद्य कपिञ्जलो नायातः? किं केनापि पाशेन बद्धः? अहोस्वित् केनापि व्यापादितः? सर्वथा यदि कुशली भवति, तन्मां विना न तिष्ठति। एवं मे चिन्तयतो बहूनि अहानि व्यतिक्रान्तानि। ततश्च तत्र कोटरे कदाचित् शीघ्रगो नाम शशकः अस्तमनवेलायाम् आगत्य प्रविष्टः। मयापि कपिञ्जलनिराशत्वेन न निवारितः। अथ अन्यस्मिन् अहनि कपिञ्जलः शालिभक्षणात् अतीव पीवरतनुः स्वमाश्रयं स्मृत्वा भूयोऽपि अत्रैव समायातः।

अथवा साध्विदम् उच्यते-

**न तादृग्जायते सौख्यम् अपि स्वर्गे शरीरिणाम् ।**
**दारिद्र्येऽपि हि यादृक्स्यात्स्वदेशे स्वपुरे गृहे ।।**

अथासौ कोटरान्तर्गतं शशकं दृष्ट्वा साक्षेपम् आह-

भोः! मदीयम् एतत् गृहम्। तत् शीघ्रं निष्क्रम्यताम्।

शशक आह-

'न तवेदं गृहम्, किन्तु ममैव। तत्किं मिथ्या परुषाणि जल्पसि' ? उक्तं च-

**वापीकूपतडागानां देवालयकुजन्मनाम्।**
**उत्सर्गात्परतः स्वाम्यमपि कर्तुं न शक्यते।।**

तथा च-

**प्रत्यक्षं यस्य यद्भुक्तं क्षेत्राद्यं दश वत्सरान्।**
**तत्र भुक्तिः प्रमाणं स्याद् न साक्षी नाक्षराणि वा।।**
**मानुषाणामयं न्यायो मुनिभिः परिकीर्तितः।**
**तिरश्चां च विहङ्गानां यावदेव समाश्रयः।।**

'तन्ममैतद्गृहम्, न तव' इति।

कपिञ्जल आह-

'भोः! यदि स्मृतिं प्रमाणीकरोषि, तदागच्छ, मया सह येन स्मृतिपाठकं पृष्ट्वा स यस्य ददाति स गृह्णातु'।

तथानुष्ठिते मयापि चिन्तितम्- किम् अत्र भविष्यति? मया द्रष्टव्योऽयं न्यायः। ततः कौतुकादहम् अपि तावनुप्रस्थितः। अत्रान्तरे तीक्ष्णदंष्ट्रो नाम अरण्यमार्जारः तयोः

विवादं श्रुत्वा मार्गासन्नं नदीतटम् आसाद्य कृतकुशोपग्रहो निमीलितैकनयनः ऊर्ध्वबाहुः अर्धपादस्पृष्टभूमिः श्रीसूर्याभिमुख इमां धर्मोपदेशनाम् अकरोत्-

'अहो! असारोऽयं संसारः। क्षणभङ्गुराः प्राणाः। स्वप्नसदृशः प्रियसमागमः। इन्द्रजालवत् कुटुम्बपरिग्रहोऽयम्। तद्धर्मं मुक्त्वा नान्या गतिरस्ति'।

उक्तं च-

**अनित्यानि शरीराणि विभवो नैव शाश्वतः।**
**नित्यं सन्निहितो मृत्युः कर्तव्यो धर्मसंग्रहः।।**

**यस्य धर्मविहीनानि दिनान्यायान्ति यान्ति च।**
**स लोहकारभस्त्रेव श्वसन्नपि न जीवति ।।**

अन्यच्च-

**पुलाका इव धान्येषु पूतिका इव पक्षिषु।**
**मशका इव मर्त्येषु येषां धर्मो न कारणम् ।।**

**श्रेयः पुष्पफलं वृक्षाद्दध्नः श्रेयो घृतं स्मृतम् ।**
**श्रेयस्तैलं च पिण्याकाच्छ्रेयान्धर्मस्तु मानुषात् ।।**

**सङ्क्षेपात्कथ्यते धर्मो जनाः किं विस्तरेण वः।**
**परोपकारः पुण्याय पापाय परपीडनम्।।**

**श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्।**
**आत्मनः प्रतिकूलानि परेषां न समाचरेत्।।**

अथ तस्य तां धर्मोपदेशनां श्रुत्वा शशक आह-

'भोः भोः कपिञ्जल! एष नदीतीरे तपस्वी धर्मवादी तिष्ठति । तदेनं पृच्छावः'।

कपिञ्जल आह-

'ननु स्वभावतोऽयम् अस्माकं शत्रुभूतः । तद्दूरे स्थित्वा पृच्छावः । कदाचिदस्य व्रतवैकल्यं सम्पत्स्यते'।

ततो दूरस्थो तौ ऊचतुः-

'भोः तपस्विन्! धर्मोपदेशक ! आवयोः विवादो वर्तते। तद्धर्मशास्त्रद्वारेण अस्माकं निर्णयं देहि। यो हीनवादी स ते भक्ष्य' इति।

स आह-

भद्रौ ! मा मैवं वदतः। निवृत्तोऽहं नरकमार्गात् हिंसाकर्मणः। अहिंसैव धर्ममार्गः। उक्तं च-

**अहिंसापूर्वको धर्मो यस्मात्सर्वहिते रतः।**
**यूकामत्कुणदंशादीन् तस्मात्तानपि रक्षयेत् ॥**

**हिंसकान्यपि भूतानि यो हिंसति स निर्घृणः।**
**स याति नरकं घोरं किं पुनर्यः शुभानि च ॥**

एतेऽपि ये याज्ञिका यज्ञकर्मणि पशून् व्यापादयन्ति, ते मूर्खाः। परमार्थं श्रुतेः न जानन्ति। तत्र किल एतदुक्तम् - यत् अजैः यष्टव्यम्। अजाः= व्रीहयः, तावत्सप्तवार्षिकाः कथ्यन्ते, न पुनः पशुविशेषः। उक्तं च-

**वृक्षांश्छित्त्वा पशून्हत्वा कृत्वा रुधिरकर्दमम् ।**
**यद्येवं गम्यते स्वर्गं नरकं केन गम्यते॥**

तन्नाहं भक्षयामि। परं जयपराजयनिर्णयं करिष्यामि। किन्तु अहं वृद्धः, अतः दूरात् यथावत् न शृणोमि। एवं ज्ञात्वा समीपवर्तिनौ भूत्वा ममाग्रे विवादं वदतम्, येन विज्ञाय, विवादपरमार्थं वचो वदतो मे परलोकबाधा न भवति । उक्तं च-

**मानाद्वा यदि वा लोभात्क्रोधाद्वा यदि वा भयात्।**
**यो न्यायमन्यथा ब्रूते स याति नरकं नरः।।**

तथा च-

**पञ्चपश्वनृते हन्ति दश हन्ति गवानृते।**
**शतं कन्यानृते हन्ति सहस्रं पुरुषानृते ।।**

**उपविष्टः सभामध्ये यो न वक्ति स्फुटं वचः।**
**तस्माद्दूरेण स त्याज्यो न यो वा कीर्तयेद्धृतम् ।।**

तस्माद्विस्रब्धौ भूत्वा मम कर्णोपान्तिके स्फुटं निवेदयतम्। किं बहुना ? तेन क्षुद्रेण तथा तौ तूर्णं विश्वासितौ उभौ यथा बुद्धिविहीनौ तौ अङ्कवर्तिनौ सञ्जातौ, ततश्च तेनापि समकालमेव एकः पादान्तेन आक्रान्तः, अन्यः दंष्ट्राक्रकचेन च। ततो तौ गतप्राणौ भक्षितौ। अतोऽहं ब्रवीमि-

**क्षुद्रमर्थपतिं प्राप्य न्यायान्वेषणतत्परौ।**
**उभावपि क्षयं प्राप्तौ पुरा शशकपिञ्जलौ।।**

## अभ्यासः

### १. लघुसमाधानप्रश्नाः

१. पञ्चतन्त्रे कति भागाः सन्ति, ते के?

२. तीक्ष्णदंष्ट्रस्य धर्मोपदेशं श्रुत्वा शशकः किमवदत्?

३. समीपमागतान् शश-कपिञ्जलान् तीक्ष्णदंष्ट्रः किमकरोत्?

४. कयोः मध्ये विवादः वर्तते?

## २. एकपदसमाधानप्रश्नाः

१. पञ्चतन्त्रं केन विरचितम्?

२. शश-कपिञ्जलौ केन भक्षितौ?

३. क्षणभङ्गुराः के?

४. तीक्ष्णदंष्ट्रः कः?

## व्याकरणांशाः

## ३. सन्धयः

| | | |
|---|---|---|
| मया + अपि | = मयापि | - सवर्णदीर्घसन्धिः |
| केन + अपि | = केनापि | - सवर्णदीर्घसन्धिः |
| मम + अग्रे | = ममाग्रे | - सवर्णदीर्घसन्धिः |
| अथ + असौ | = अथासौ | - सवर्णदीर्घसन्धिः |
| न + अन्या | = नान्या | - सवर्णदीर्घसन्धिः |
| कोटर +अन्तर्गतम् | = कोटरान्तर्गतम् | - सवर्णदीर्घसन्धिः |
| तव + इदम् | = तवेदम् | - गुणसन्धिः |
| धर्म + उपदेशः | = धर्मोपदेशः | - गुणसन्धिः |
| सदा + एव | = सदैव | - वृद्धिसन्धिः |
| न + एव | = नैव | - वृद्धिसन्धिः |
| मा + एव | = मैव | - वृद्धिसन्धिः |
| मम + एतत् | = ममैतत् | - वृद्धिसन्धिः |
| तौ + ऊचतुः | = तावूचतुः | - अयवायावादेशसन्धिः |

| | | |
|---|---|---|
| उभौ + अपि | = उभावपि | - अयवायावादेशसन्धिः |
| एते + अपि | = एतेऽपि | - पूर्वरूपसन्धिः |

### ४. समासाः

| | | |
|---|---|---|
| कोटरान्तरे | - कोटरस्य अन्तरे | - षष्ठीतत्पुरुषसमासः |
| अहिंसा | - न हिंसा | - नञ् तत्पुरुषसमासः |
| धर्मवादी | - धर्मस्य वादी | - षष्ठीतत्पुरुषसमासः |
| धर्मोपदेशः | - धर्मस्य उपदेशः | - षष्ठीतत्पुरुषसमासः |
| नदीतटे | - नद्याः तटे | - षष्ठीतत्पुरुषसमासः |
| शशकपिञ्जलौ | - शशः च कपिञ्जलः च | - द्वन्द्वसमासः |

# ४ श्रीमलयाळस्वामी-संस्कृतभाषासेवा

म.म. समुद्राल. लक्ष्मणय्य

## परिचयः

श्री समुद्राल.लक्ष्मणय्यमहोदयः बाल्ये महर्षिसद्गुरुश्रीमलयाळस्वामिभिः तिरुपति-श्रीकाळहस्तिक्षेत्रयोर्मध्ये एर्पेडुग्रामसमीपे स्थापिते व्यासाश्रमसंस्कृतविद्यालये संस्कृताध्ययनं कृतवान्। तदनु तिरुपतिक्षेत्रे श्रीवेङ्कटेश्वरप्राच्यकळाशालायाम् उन्नतविद्यामभ्यस्य साहित्यशिरोमणिपरीक्षायामुत्तीर्णो बभूव। तदनन्तरं तस्यामेव कलाशालायामध्यापकोऽभवत्। तिरुमलतिरुपतिदेवस्थानस्य धर्मप्रचारपरिषदः कार्यदर्शिपदवीं प्राप्य धर्मप्रचारं चकार। संस्कृतान्ध्रभाषयोः त्रिंशदधिकग्रन्थानां कर्ताऽयं पण्डितः, राष्ट्रियसंस्कृतविद्यापीठेन वाचस्पतिः महामहोपाध्यायः इति द्वाभ्यां पुरस्काराभ्यां सम्मानित आसीत्।

अस्मिन् पाठ्यभागे श्रीमलयाळस्वामिभिः संस्कृतभाषाप्रचारविषये कृतां सेवां विशदीचकार।

### पाठ्यभाग:

ये समाजं ज्ञानप्रदानेन चैतन्यवन्तं कुर्वन्ति, त एव महापुरुषा इति कीर्त्यन्ते। तादृशानां महात्मनां सम्भवः लोके विरल एवावलोक्यते। न केवलं प्राचीने काले, अपि तु नवीनेऽपि अनेके तत्त्वज्ञाः इमां भुवमवतीर्णाः। तादृशेषु महापुरुषेषु श्रीमलयाळस्वामी अन्यतमः।

अयं गुरूत्तमः २७-०३-१८८५ दिनाङ्के केरलदेशे त्रिचूरमण्डले गुरुवायूर् क्षेत्रस्य समीपे एन्नाण्ड्यूर् नामके ग्रामे जन्म लेभे। नोट्टियम्मा - करियप्पाख्यौ पुण्यदम्पती तस्य जननीजनकौ बभूवतुः। वेलप्पनाम्ना समलङ्कृतोऽयं जन्मान्तरसुकृतवशात् बाल्य एव स्वीयमसाधारणं व्यक्तित्वं प्रदर्शयामास। भगवद्भक्तिः, ध्याननिष्ठा, जीवकारुण्यम् इत्यादयः तस्य सहजाताः सद्गुणाः। बाल्ये एव तीव्रध्याननिमग्नं तं वीक्ष्य जनाः आश्चर्यचकिता बभूवुः।

तस्मिन् काले केरलेषु श्रीनारायणगुरुरिति कश्चन प्रख्यातो यतीश्वर आसीत्। स च जनानामाध्यात्मिकसाङ्घिकपुरोगमनार्थं महतीं कृषिमनुष्ठितवान्। तस्य शिष्यः श्रीसिद्धशिवलिङ्गगुरुस्वामी स्वगुरोः आशयस्य ब्रह्मविद्यायाश्च प्रचारार्थं कञ्चनाश्रमं गुरुकुलं च प्रतिष्ठापयामास।

वेलप्पः तद्गुरुकुलं प्रविश्य गैर्वाणीं वाणीं सम्यक् अभ्यस्य गीताम्, उपनिषदः, ब्रह्मसूत्राणि, अपरानपि अनेकान् वेदान्तग्रन्थान् पपाठ। अष्टादशे वयसि तीव्रवैराग्यप्रेरितः सन् कस्यांचित् रात्रौ स एकाकी गृहं परित्यज्य भारतभूमौ तीर्थक्षेत्रसेवनार्थं जिगमिषुः पितरावुद्दिश्य पत्रे किञ्चिद्विलिख्य तत्पत्रं गृहे विससर्ज। पत्रगतः सन्देशस्तु अयम् - ‘‘यावत्पर्यन्तं गृहमुपागतेभ्यः अतिथिभ्यः भवन्तः अन्नपानादिकं दास्यन्ति, तावत्पर्यन्तं भोजनादिषु मम न कोऽपि श्रमो भविष्यति। अहं दैवकार्यार्थं गच्छामि। मामन्वेष्टुं व्यर्थं प्रयत्नं मा कुर्वन्तु’’ इति।

एवं गृहं त्यक्त्वा वैराग्यैकसहायः पद्भ्यामेव भुवं पर्यटन् स महापुरुषः उत्तरदक्षिणदेशयोः विख्यातानि सकलान्यपि पुण्यक्षेत्राणि ददर्श। वत्सरत्रयावधिकेऽस्मिन् यात्राकाले भारतदेशस्य स्वरूपं च तेन सम्यगवगतम्। पर्यटनसमये काशीक्षेत्रात्

गङ्गाजलमानीय रामेश्वरस्थस्य शिवस्य अभिषेचनमपि कृतवान्। तपस्सिद्धिं प्राप्य लोकोद्धारकैः कार्यैः देशसेवाऽपि करणीयेति सङ्कल्पोऽपि तस्य तदैव समजनि। तीर्थयात्रानन्तरं स तिरुमलक्षेत्रं गत्वा, गोगर्भतीर्थे द्वादशवर्षाणि तीव्रं तपश्चकार। तस्मिन् समये तेन बहूनि कष्टान्यनुभूतानि। अन्ते दैवसाक्षात्कारलाभेनायं धन्यजन्मा संवृत्तः। मलयाळदेशादागत इति हेतोः अयं मलयाळस्वामीति नाम्ना प्रसिद्धो जातः।

अनेन आन्ध्रभाषायां विरचितः 'शुष्कवेदान्ततमोभास्करमु' इति नामकः आध्यात्मिक-चैतन्यप्रदो ग्रन्थः परां प्रशस्तिं प्राप। ततः प्रभृति स्वामिनो यशश्चन्द्रिकाः सर्वास्वपि दिक्षु व्याप्तिमगच्छन्। तदनु स्वामी शिष्यबृन्देन सह ३-६-१९२६ दिनाङ्के शेषशैलादवतीर्य तिरुपति-श्रीकालहस्तिक्षेत्रयोः मध्ये, एर्पेडु ग्रामसमीपे रमणीयं व्यासाश्रमं स्थापयामस। आश्रमस्थापनानन्तरं स्वामिना अनेके लोकोद्धारककार्यक्रमाः निर्व्यूढाः। तेषु संस्कृतभाषाप्राचारः प्रथमतः परिगणनीयो भवति।

भारतेऽनेकाः प्रान्तीयभाषास्सन्ति। तास्सर्वा अपि संस्कृतमूलका एव। संस्कृतपरिज्ञानेन इतरभाषापरिज्ञानं वृद्धिं गच्छति। जातिमतलिङ्गभेदं विना सर्वैरपि संस्कृतम् अवश्यमध्येतव्यमिति श्रीमलयाळस्वामिनोऽभिप्रायः। अस्माकं पूर्वचरित्रं सर्वमपि संस्कृतभाषायामेव लभ्यते। तद्विज्ञानार्थं संस्कृतमवश्यं समादरणीयमिति स्वामिनो निश्चय आसीत्।

अतः १९२८ तमे वर्षे स्वामी व्यासाश्रमे संस्कृतविद्यालयं स्थापितवान्। तत्र वर्णवर्गलिङ्गभेदं विना सर्वेषामपि प्रवेशः परिकल्पितः। तदनु १९३५ तमे वत्सरे बालिका उद्दिश्य कन्यागुरुकुलं स्थापयामास। तदनन्तरं १९४५ तमे वत्सरे ब्रह्मविद्यापाठशालां संस्थापितवन्तः। एतेषु विद्यालयेषु गैर्वाणी सर्वैरपि विद्यार्थिभिः श्रद्धया समधीताऽऽसीत्।

तदनन्तरकाले स्वामिशिष्यैः प्रोद्दुटूरु, चित्तूरु, श्रीकालहस्ति, तिरुपतीत्यादि नगरेषु संस्कृतप्रबोधकविद्यालयाः प्रतिष्ठिताः। तेषु विद्यालयेषु सहस्रशः बालकाः, बालिकाश्च  अमरवाणीमभ्यस्य कृतकृत्यतां प्राप्तवन्तः।

प्राचीनसंस्कृतग्रन्थानां मुद्रणार्थं चित्तूरुनगरे स्वामिना कश्चन मुद्रणालयोऽपि स्थापितः। तस्मिन् मुद्रणालये योगवासिष्ठम्, शङ्करविजयः, पातञ्जलयोगदर्शनम्, विवेकचूडामणिः, अष्टावक्रगीता, बृहदारण्यकोपनिषत्, छान्दोग्योपनिषत् इत्यादयो बहवः संस्कृतग्रन्थाः व्यासाश्रमद्वारा प्रकटिताः। तथा च स्वामिना बहवो ग्रन्थाः विरचिताः सन्ति। तेषु श्रीमलयाळयतीन्द्रगीता इति सहस्राधिकश्लोकयुक्तो ग्रन्थः आधुनिकसंस्कृतग्रन्थेष्वग्रगण्यो विलसति। स्वामिकृता भगवद्गीताव्याख्या गीतामकरन्दमिति नाम्ना सुप्रसिद्धा।

अयं १९३६ तमे वत्सरे यत्याश्रमं स्वीचकार। तदा तस्य 'असङ्गानन्दगिरिस्वामी' इति यद्यपि नाम कृतम्, तथाऽपि जनास्तं मलयाळस्वामीति नाम्नैव व्यवहरन्ति स्म। स्वामिना अनेके वेदान्तग्रन्थाश्च विरचिताः। बहूनां संस्कृतग्रन्थानां व्याख्यानानि, अनुवादाश्च पण्डितैः लेखयित्वा प्रकटीकृताः।

एवं लोककल्याणमेव परमावधित्वेन सम्भाव्य, अज्ञेभ्यो ज्ञानभिक्षां दत्त्वा, आर्षधर्मं पुनः समुद्धृत्य कृतकृत्योऽयं सद्गुरुः १२-७-१९६२ तमे दिने पुण्यतिथौ गुरुवासरे सिद्धिं प्राप्तवान्।

# अभ्यासः

## १. लघुसमाधानप्रश्नाः

१. पत्रगतसन्देशः कः ?

२. व्यासाश्रमद्वारा प्रकटिताः ग्रन्थाः के?

३. वेलप्पः गुरुकुलं प्रविश्य कान् पपाठ?

४. व्यासाश्रमं कुत्र स्थापयामास?

## २. एकपदसमाधानप्रश्नाः

१. के महापुरुषाः ?

२. मलयाळस्वामिनः जननीजनकौ कौ?

३. तीर्थयात्रानन्तरं कुत्र तीव्रं तपश्चकार?

४. मलयाळस्वामि - संस्कृतभाषासेवा इति पाठ्यभागः केन विरचितः?

## व्याकरणांशाः

## ३. सन्धयः

| | | |
|---|---|---|
| नवीने + अपि | = नवीनेऽपि | - पूर्वरूपसन्धिः |
| इति + आदयः | = इत्यादयः | - यणादेशसन्धिः |
| यति + ईश्वरः | = यतीश्वरः | - सवर्णदीर्घसन्धिः |
| तत् + गुरुकुलम् | = तद्गुरुकुलम् | - जश्त्वसन्धिः |
| पितरौ + उद्दिश्य | = पितरावुद्दिश्य | - अवयावादेशसन्धिः |
| कः + अपि | = कोऽपि | - विसर्गसन्धिः |

| | | | |
|---|---|---|---|
| यति + आश्रमम् | = यत्याश्रमम् | - यणादेशसन्धिः |
| अध्ययनेन + एव | = अध्ययनेनैव | - वृद्धिसन्धिः |

## ४. समासाः

| | | |
|---|---|---|
| यत्याश्रमम् | - यतेः आश्रमम् | - षष्ठीतत्पुरुषसमासः |
| देशसेवा | - देशस्य सेवा | - षष्ठीतत्पुरुषसमासः |
| गीतावचनम् | - गीतायाः वचनम् | - षष्ठीतत्पुरुषसमासः |
| पितरौ | - माता च पिता च | - द्वन्द्वसमासः |
| जननीजनकौ | - जननी च जनकश्च | - द्वन्द्वसमासः |
| तिरुमलक्षेत्रम् | - तिरुमल इति क्षेत्रम् | - सम्भावनापूर्वपदकर्मधारयः |

# ५ स्वेदस्य पुष्पाणि

डा.माधवी जोषी

## परिचयः

**स्वेदस्य पुष्पाणि** इत्ययं गद्यपाठ्यांशः **मधुराः कथाः** इत्यस्मात् ग्रन्थात् स्वीकृतः। मराठीभाषायाम् अस्य रचयिता पाण्डुरङ्ग सदाशिवसाने महोदयः। अयम् अनुवादग्रन्थः, मराठी मूलकः। मधुराः कथाः इति नाम्ना, **डॉ. माधवी जोषी** संस्कृते अनूदितवती। इयं चिपलूणग्रामे अध्यापिका सती विविधेषु संस्कृतकार्यक्रमेषु भागं स्वीकृत्य संस्कृतसेवां करोति। मधुराः कथाः इत्यस्मिन् ग्रन्थे स्वेदस्य पुष्पाणि, महान् त्यागः, स्वर्गमाला, वामनभटस्य धेनुः, बहुला धेनुः, यस्य भावः तस्य देवः इत्यादिकथाः विद्यन्ते।

### पाठ्यभागः

एकदा शिक्षकः छात्रैः सह वनभोजनार्थं गतवान्। छात्राः अतीव प्रमुदिताः। काव्यशास्त्रविनोदं कुर्वन्तः शिक्षकः छात्राश्च गच्छन्ति स्म। अस्मिन् जगति किं जलम् अतीव उत्तमम्? अतीव पूतं जलं किम्? किं च जलं मूल्यवत्? इति शिक्षकः प्रश्नं पृष्टवान्। गङ्गायाः जलं सर्वेषु पूतम् इति सदाशिवः उक्तवान्। पर्जन्यस्य जलं सर्वेषु महत्त्वपूर्णम् इति विनायकः उक्तवान्। पश्चात्तापात् नेत्रमुक्तं जलं सर्वेषु महत्तमम् इति विचारं कुर्वन् लक्ष्मणः उक्तवान्। एतैः उत्तरैः असंतुष्टः शिक्षकः मम मनसि यत् उत्तरम् आसीत् तत् केनापि न कथितम् इत्युक्तवान्। भवतः मनसि किम् उत्तरम् अस्ति? इति छात्राः पृष्टवन्तः। अहम् एकां कथां कथयामि। ततः भवन्तः उत्तरं ज्ञातुम् अर्हन्ति इति शिक्षकः उक्त्वा कथाम् आरब्धवान्।

रामः लक्ष्मणः च सीताम् अन्विष्यन्तौ वने अटतः स्म। मार्गे शबरी मिलितवती। सा रामस्य पूजां कृत्वा मधुरफलानि समर्पितवती। यत्र शबरी निवसति स्म स कश्चन प्राचीनः आश्रमः आसीत्। तस्य आश्रमस्य पुरतः यावत् दूरे दृष्टिः प्रसार्यते तावत् सुन्दराणि सुगन्धितानि पुष्पाणि एव दृश्यन्ते स्म। रामचन्द्रः पुनः पुनः तानि पुष्पाणि पश्यति स्म। सः शबरीं पृष्टवान्, शबरि! कः एतेषां पुष्पसस्यानाम् आरोपणं कृतवान्? अहो कियन्ति सुन्दराणि दृश्यन्ते स्म! अहो सुगन्धोऽपि कियान् मधुरः!

शबरी प्रत्युत्तरं दत्तवती, राम! एतस्य कश्चन इतिहासः अस्ति। अहं कथयामि, शृणोतु भवान्। बहुभ्यः वर्षेभ्यः पूर्वम् अत्र मतङ्गस्य महर्षेः आश्रमः आसीत्। तस्य कीर्तिः सुदूरं प्रसृता। नानाप्रदेशतः विद्यार्थिनः तस्य आश्रमम् अध्ययनार्थम् आगत्य निवसन्ति स्म। एकदा किमभवत्? ग्रीष्मकालः समाप्तप्रायः। अचिरादेव वर्षाकालः आरप्स्यते। किन्तु वर्षाकालार्थम् आश्रमे इन्धनस्य कापि व्यवस्था न कृता। शुष्ककाष्ठसंग्रहः कृतः नासीत्। वर्षाकाले आर्द्रकाष्ठानि कथं ज्वलेयुः? पाकः कथं भवेत्? यावत् ग्रीष्मस्य दिनचतुष्टयम् अवशिष्टं तावदेव अरण्यतः शुष्ककाष्ठानां सञ्चाः आनीय स्थापनीयाः। परन्तु कः गमिष्यति, आनेष्यति च?

छात्राः स्वयमेव वनं गमिष्यन्तीति मतङ्गः ऋषिः चिन्तयति स्म। किन्तु छात्राः न गतवन्तः। अन्ते एकस्मिन् दिने वृद्धः मतङ्गऋषिः हस्ते कुठारं गृहीत्वा स्वयं प्रस्थानं कृतवान्। एतत् दृष्ट्वा सर्वे छात्राः अपि प्रस्थिताः। आश्रमे निवासार्थम् आगताः अतिथयः महर्षयः अपि प्रस्थानं कृतवन्तः। सर्वे वनं गत्वा काष्ठकर्तनं कृतवन्तः। काष्ठानां महासञ्चाः च बद्धाः। बालाः प्रौढाश्च सर्वे काष्ठसञ्चान् मस्तके निधाय आश्रमं प्रतिनिवृत्ताः। तृतीयः प्रहरः आसन्नः। सर्वे स्वेदक्लिन्नाः। शरीरतः स्वेदः पतति स्म। ते स्वेदबिन्दवः भूमौ पतन्ति स्म। आश्रमः प्राप्तः। सर्वे शीघ्रं सुप्तवन्तः।

उषः कालः अभवत्। मतङ्गऋषिः मधुरस्वरेण आहूय छात्रान् अजागरयत्। यावत् सः छात्रैः सह यथाप्रकारं नदीं प्रति प्रस्थितः तावत् अहो आश्चर्यम्! सहसा मधुरः सुगन्धः आगतः। कुतः आगच्छति मधुरः गन्धः? इति छात्राः पृच्छन्ति स्म। गच्छन्तु, अन्विष्यन्तु इति मतङ्गऋषिः उक्तवान्। तस्य सुगन्धस्य अन्वेषणं कर्तुं छात्राः प्रस्थितवन्तः। यया दिशा सुगन्धः आगच्छति स्म तया दिशा चलितवन्तः। येन मार्गेण पूर्वेद्युः ते वनं गतवन्तः तथा प्रत्यागतवन्तः च, तस्य मार्गस्य दिशः सुगन्धः आगच्छति स्म। छात्राः तत्रैव गतवन्तः।

राम! किं ते दृष्टवन्तः? ते बालकाः स्थाने स्थाने सुन्दराणि पुष्पाणि विकसितानि दृष्टवन्तः। पुष्पाणि पूर्वेद्युः नासन्। सहसा कुतः आगतानि? किम् आकाशस्थाः तारकाः आश्रमस्य पुरतः आगत्य पूताः भवितुम् इच्छन्ति स्म? कः पुष्पसस्यानाम् आरोपणं कृतवान्?

छात्राः धावन्तः मतङ्गऋषेः समीपम् आगत्य ताम् आश्चर्यकथां गुरवे निवेदितवन्तः। मतङ्गऋषिः स्वयं तदपूर्वं दृश्यं द्रष्टुं गतवान्। रमणीयम् अपूर्वं दृश्यम्। मतङ्गऋषिः पश्यन् एव स्थितः। सोऽपि भक्तिमयेन स्नेहेन तानि पुष्पाणि हस्तेन स्पृष्ट्वा तेषां वन्दनं कृतवान्।

भगवन्, कुतः आगतानि एतानि पुष्पाणि? इति छात्राः पृष्टवन्तः।

"भवतां स्वेदतः। ह्यः भवन्तः एतेन मार्गेण मस्तके काष्ठसञ्चान् गृहीत्वा आगतवन्तः। भवतां शरीरेभ्यः स्वेदः निपतति स्म। सः अस्यां भूमौ पतति स्म। सः भूमिं सिञ्चति स्म इव। श्रमजातः पवित्रः स्वेदः। कर्मणां स्वेदः। ततः पवित्रं किम् अस्ति? भवन्तः कथं श्राम्यन्ति? कथं स्वेदक्लिन्नाः भवन्ति? इति द्रष्टुं भूमाता एतानि पुष्परूपाणि सहस्रं नेत्राणि उद्घाटितवती इव। तस्याः हृदयं भवताम् उद्योगं दृष्ट्वा विकसितम् इव। हे

बालकाः! **न हि परिश्रमात् ऋते पवित्रम् इह किमपि विद्यते।** श्रमस्य स्वेदः न भवति चेत् जगत् कथं प्रचलेत्? कृषीवलः न श्राम्यति चेत्, तस्य स्वेदः क्षेत्रे न पतति चेत् सस्यं कथं वर्धेत? वायिकः वस्त्रं वयन् श्रान्तः न भवति चेत् भवन्तः शरीरेषु किं धरेयुः? एतज्जगत् श्रामिकैः प्रचाल्यते। भवन्तः यदा तरुणाः भविष्यन्ति तदा स्वयं श्राम्यन्तु। श्रामिकाणां सम्मानं कुर्वन्तु। ज्ञातं किं भवद्भिः?'' इति मतङ्गऋषिः स्नेहेन पृष्टवान्।

''आम्, आचार्य! वयं श्रमं करिष्यामः। किमपि कार्यं कर्तुं न लज्जामहे। श्रामिकान् तृणवत् न गणयेम। वयं श्रामिकाणां सम्मानं कुर्याम। तैः विश्वं प्रचाल्यते इति सदैव मनसि निधाय तेषु कृतज्ञाः भवेम। प्रथमं ते सुखिनः सन्ति उत न इति पश्येम'' इति छात्राः मतङ्गऋषिम् उक्तवन्तः।

राम! एषः एतेषां पुष्पाणाम् इतिहासः अस्ति। एतानि पुष्पाणि सदैव द्वादशमासेषु विकसन्ति। कोऽपि तेभ्यः जलं ददाति उत न ददाति चेदपि एतानि नित्यं प्रफुल्लितानि, विकसितानि दृश्यन्ते। स्वेदस्य सः एकः बिन्दुः अनन्तकालपर्यन्तं तेभ्यः आर्द्रतां दास्यति इव। राम! भवते ददानि किम् एतानि पुष्पाणि? मास्तु! अहं मतङ्गमहर्षेः पुण्यरूपाणि एतानि पुष्पाणि वन्दे इति उक्त्वा रामः तानि पुष्पाणि नमस्कृतवान्। लक्ष्मणः अपि नमस्कृतवान्। रामलक्ष्मणौ प्रस्थितौ।

शिक्षकः कथनं स्थगितवान्। छात्राः न वदन्ति स्म। सर्वे मौनेन चलन्ति स्म। समाप्ता किं कथा? इति मधुकरः पृष्टवान्। तर्हि किं जलम् उत्तमम्? धनिकानां तु सततं स्वेदः उद्भवति। तल्पे शयानानां तेषां स्वेदः आगच्छति। शरीरे बहूनि वस्त्राणि भवन्ति अतः स्वेदः आगच्छति। केषाञ्चन जनानां शरीरे अतीव वातप्रकोपः भवति। तेषां कियान् स्वेदः आगच्छति इति मधुकरः पुनः पृष्टवान्।

सः स्वेदः न। यस्मात् स्वेदात् किमपि उपयोगिवस्तु निर्मितं भवति, सर्वेषां कृते आवश्यकानि वस्तूनि निर्मितानि भवन्ति, धान्यम्, पुष्पाणि, फलानि, गृहाणि, द्वाराणि, वस्त्राणि, गृहोपयोगीनि विविधानि वस्तूनि निर्मितानि भवन्ति सः स्वेदः पवित्रः। सः परिश्रमजनितस्य उद्यमस्य स्वेदः। यः स्वेदः मस्तकतः, शरीरतः च निर्गच्छति सः पवित्रः, सः पूज्यः, सः युक्तः, सत्यं स एव मनुष्यः। किन्तु इदानीं तादृशाः जनाः विरलाः। भवन्तः यदा तरुणाः भविष्यन्ति तदा तेषां निमित्तं कार्यं कुर्वन्तु। तेषां जीवनं सुखमयं कुर्वन्तु इति शिक्षकः उक्तवान्।

## अभ्यासः

### १. निबन्धप्रश्नौ

१.'स्वेदस्य पुष्पाणि' इति पाठ्यभागसारांशं लिखत ?

२. शबरी रामाय कां कथामुक्तवती?

### २. लघुसमाधानप्रश्नाः

१. शिक्षकः छात्रान् कं प्रश्नं पृष्टवान्?

२. रामचन्द्रः शबरीं किं पृष्टवान्?

३. कः स्वेदः पवित्रः?

४. बालकाः स्थाने स्थाने कानि दृष्टवन्तः?

## ३. एकपदसमाधानप्रश्नाः

१. स्वेदबिन्दवः कुत्र पतन्ति स्म?

२. स्वेदस्य पुष्पाणि इति पाठ्यभागः कस्मात् स्वीकृतः?

३. स्वेदस्य पुष्पाणि दृष्ट्वा रामः किं कृतवान्?

४. तृणवत् कान् न गणयेम?

## ४. सन्दर्भवाक्यानि

१. पर्जन्यस्य जलं सर्वेषु महत्त्वपूर्णम्।

२. एतत् जगत् श्रामिकैः प्रचाल्यते।

३. न हि परिश्रमात् ऋते पवित्रम् इह किमपि विद्यते।

४. पुण्यरूपाणि एतानि पुष्पाणि वन्दे।

### विशेषतो ज्ञेयाः

## ५. सन्धयः

| | | |
|---|---|---|
| सदा + एव | = सदैव | - वृद्धिसन्धिः |
| केन + अपि | = केनापि | - सवर्णदीर्घसन्धिः |
| प्रति + उत्तरम् | = प्रत्युत्तरम् | - यणादेशसन्धिः |
| इति + उक्तवान् | = इत्युक्तवान् | - यणादेशसन्धिः |
| तत्र + एव | = तत्रैव | - वृद्धिसन्धिः |
| महा + ऋषिः | = महर्षिः | - गुणसन्धिः |